# ——— ऋग्वेद-संहिता — मण्डल २ ———

## Ṛgveda-Saṁhitā—Maṇḍala 2

2.001.01a त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि ।

2.001.01c त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः ॥

2.001.01a tvam agne dyubhis tvam āśuśukṣaṇis tvam adbhyas tvam aśmanas pari |
2.001.01c tvaṁ vanebhyas tvam oṣadhībhyas tvaṁ nṛṇāṁ nṛpate jāyase śuciḥ ||

2.001.02a तवाग्ने होत्रं तव पोत्रमृत्वियं तव नेष्ट्रं त्वमग्निदृतायतः ।

2.001.02c तव प्रशास्त्रं त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश्च नो दमे ॥

2.001.02a tavāgne hotraṁ tava potram ṛtviyaṁ tava neṣṭraṁ tvam agnid ṛtāyataḥ |
2.001.02c tava praśāstraṁ tvam adhvarīyasi brahmā cāsi gṛhapatiś ca no dame ||

2.001.03a त्वमग्न इन्द्रो वृषभः सतामसि त्वं विष्णुरुरुगायो नमस्यः ।

2.001.03c त्वं ब्रह्मा रयिविद्ब्रह्मणस्पते त्वं विधर्तः सचसे पुरंध्या ॥

2.001.03a tvam agna indro vṛṣabhaḥ satām asi tvaṁ viṣṇur urugāyo namasyaḥ |
2.001.03c tvam brahmā rayivid brahmaṇas pate tvaṁ vidhartaḥ sacase purandhyā ||

2.001.04a त्वमग्ने राजा वरुणो धृतव्रतस्त्वं मित्रो भवसि दस्म ईड्यः ।

2.001.04c त्वमर्यमा सत्पतिर्यस्य सम्भुजं त्वमंशो विदथे देव भाजयुः ॥

2.001.04a tvam agne rājā varuṇo dhṛtavratas tvam mitro bhavasi dasma īḍyaḥ |
2.001.04c tvam aryamā satpatir yasya sambhujaṁ tvam aṁśo vidathe deva bhājayuḥ ||

2.001.05a त्वमग्ने त्वष्टा विधते सुवीर्यं तव ग्नावो मित्रमहः सजात्यम् ।

2.001.05c त्वमाशुहेमा ररिषे स्वश्व्यं त्वं नरां शर्धो असि पुरूवसुः ॥

2.001.05a tvam agne tvaṣṭā vidhate suvīryaṁ tava gnāvo mitramahaḥ sajātyam |
2.001.05c tvam āśuhemā rariṣe svaśvyaṁ tvaṁ narāṁ śardho asi purūvasuḥ ||

2.001.06a त्वमग्ने रुद्रो असुरो महो दिवस्त्वं शर्धो मारुतं पृक्ष ईशिषे ।

2.001.06c त्वं वातैररुणैर्यासि शंगयस्त्वं पूषा विधतः पासि नु त्मना ॥

2.001.06a tvam agne rudro asuro maho divas tvaṁ śardho mārutam pṛkṣa īśiṣe |
2.001.06c tvaṁ vātair aruṇair yāsi śaṅgayas tvam pūṣā vidhataḥ pāsi nu tmanā ||

2.001.07a त्वमग्ने द्रविणोदा अरंकृते त्वं देवः सविता रत्नधा असि ।

2.001.07c त्वं भगो नृपते वस्व ईशिषे त्वं पायुर्दमे यस्तेऽविधत् ॥

2.001.07a tvam agne draviṇodā araṅkṛte tvaṁ devaḥ savitā ratnadhā asi |
2.001.07c tvam bhago nṛpate vasva īśiṣe tvam pāyur dame yas te 'vidhat ||

2.001.08a त्वामग्ने दम आ विश्पतिं विशस्त्वां राजानं सुविदत्रमृञ्जते ।

2.001.08c त्वं विश्वानि स्वनीक पत्यसे त्वं सहस्राणि शता दश प्रति ॥

2.001.08a tvām agne dama ā viśpatiṁ viśas tvāṁ rājānaṁ suvidatram ṛñjate |
2.001.08c tvaṁ viśvāni svanīka patyase tvaṁ sahasrāṇi śatā daśa prati ||

2.001.09a त्वामग्ने पितरमिष्टिभिर्नरस्त्वां भ्रात्राय शम्या तनूरुचम् ।

2.001.09c त्वं पुत्रो भवसि यस्तेऽविधत्त्वं सखा सुशेवः पास्याधृषः ॥

2.001.09a tvām agne pitaram iṣṭibhir naras tvām bhrātrāya śamyā tanūrucam |
2.001.09c tvam putro bhavasi yas te 'vidhat tvaṁ sakhā suśevaḥ pāsy ādhṛṣaḥ ||

2.001.10a त्वमग्न ऋभुराके नमस्य१स्त्वं वाजस्य क्षुमतो राय ईशिषे ।

2.001.10c त्वं वि भास्यनु दक्षि दावने त्वं विशिक्षुरसि यज्ञमातनिः ॥

2.001.10a tvam agna ṛbhur āke namasya1s tvaṁ vājasya kṣumato rāya īśiṣe |
2.001.10c tvaṁ vi bhāsy anu dakṣi dāvane tvaṁ viśikṣur asi yajñam ātaniḥ ||

2.001.11a त्वमग्ने अदितिर्देव दाशुषे त्वं होत्रा भारती वर्धसे गिरा ।

2.001.11c त्वमिळा शतहिमासि दक्षसे त्वं वृत्रहा वसुपते सरस्वती ॥

2.001.11a tvam agne aditir deva dāśuṣe tvaṁ hotrā bhāratī vardhase girā |
2.001.11c tvam iḷā śatahimāsi dakṣase tvaṁ vṛtrahā vasupate sarasvatī ||

2.001.12a त्वमग्ने सुभृत उत्तमं वयस्तव स्पार्हे वर्ण आ संदृशि श्रियः ।

2.001.12c त्वं वाजः प्रतरणो बृहन्नसि त्वं रयिर्बहुलो विश्वतस्पृथुः ॥

2.001.12a tvam agne subhṛta uttamaṁ vayas tava spārhe varṇa ā sandṛśi śriyaḥ |
2.001.12c tvaṁ vājaḥ prataraṇo bṛhann asi tvaṁ rayir bahulo viśvatas pṛthuḥ ||

2.001.13a त्वामग्न आदित्यास आस्यं१ त्वां जिह्वां शुचयश्चक्रिरे कवे ।

2.001.13c त्वां रातिषाचो अध्वरेषु सश्चिरे त्वे देवा हविरदन्त्याहुतम् ॥

2.001.13a tvām a̍gna ādi̱tyāsa̍ ā̱syam̐1̱ tvāṁ ji̱hvāṁ śuca̍yaś cakrire kave |
2.001.13c tvāṁ rā̍ti̱ṣāco̍ adhva̱reṣu̍ saścire̱ tve de̱vā ha̱vir a̍da̱nty āhu̍tam ||

2.001.14a त्वे अग्ने विश्वे अमृतासो अद्रुह आसा देवा हविरदन्त्याहुतम् ।

2.001.14c त्वया मर्तासः स्वदन्त आसुतिं त्वं गर्भो वीरुधां जज्ञिषे शुचिः ॥

2.001.14a tve a̍gne̱ viśve̍ a̱mṛtāso a̱druha̍ ā̱sā de̱vā ha̱vir a̍da̱nty āhu̍tam |
2.001.14c tvayā̱ martā̍saḥ svadanta āsu̱tiṁ tvaṁ garbho̍ vīrudhā̍ṁ jajñiṣe̱ śuci̍ḥ ||

2.001.15a त्वं तान्सं च प्रति चासि मज्मनाग्ने सुजात प्र च देव रिच्यसे ।

2.001.15c पृक्षो यदत्र महिना वि ते भुवदनु द्यावापृथिवी रोदसी उभे ॥

2.001.15a tvaṁ tān saṁ ca̱ prati̍ cāsi ma̱jmanāgne̍ sujāta̱ pra ca̍ deva ricyase |
2.001.15c pṛ̱kṣo yad atra̍ mahi̱nā vi te̱ bhuva̱d anu̱ dyāvā̍pṛthi̱vī rodasī̍ u̱bhe ||

2.001.16a ये स्तोतृभ्यो गोअग्रामश्वपेशसमग्ने रातिमुपसृजन्ति सूरयः ।

2.001.16c अस्माञ्च ताँश्च प्र हि नेषि वस्य आ बृहद्वदेम विदथे सुवीराः ॥

2.001.16a ye sto̱tṛbhyo̱ goa̍grā̱m aśva̍peśasa̱m agne̍ rā̱tim u̍pasṛ̱janti sū̱raya̍ḥ |
2.001.16c a̱smāñ ca̱ tām̐ś ca̱ pra hi ne̱ṣi vasya̱ ā bṛ̱had va̍dema vi̱dathe̍ su̱vīrā̍ḥ ||

2.002.01a यज्ञेन वर्धत जातवेदसमग्निं यजध्वं हविषा तना गिरा ।

2.002.01c समिधानं सुप्रयसं स्वर्णरं द्युक्षं होतारं वृजनेषु धूर्षदम् ॥

2.002.01a ya̱jñena̍ vardhata jā̱tave̍dasam a̱gniṁ ya̍jadhvaṁ ha̱viṣā̱ tanā̍ gi̱rā |
2.002.01c sa̱mi̱dhā̱naṁ su̍pra̱yasa̱ṁ sva̍rṇaraṁ dyu̱kṣaṁ hotā̍raṁ vṛ̱jane̍ṣu dhū̱rṣada̍m ||

2.002.02a अभि त्वा नक्तीरुषसो ववाशिरेऽग्ने वत्सं न स्वसरेषु धेनवः ।

2.002.02c दिव इवेदरतिर्मानुषा युगा क्षपो भासि पुरुवार संयतः ॥

2.002.02a a̱bhi tvā̱ nakti̍r u̱ṣaso̍ vavā̍ś̱ire 'gne̍ va̱tsaṁ na svasa̍reṣu dhe̱nava̍ḥ |
2.002.02c di̱va i̱ved a̍ra̱tir mānu̱ṣā yu̱gā kṣapo̍ bhāsi puruvāra sa̱ṁyata̍ḥ ||

2.002.03a तं देवा बुध्ने रजसः सुदंससं दिवस्पृथिव्योररतिं न्येरिरे ।

2.002.03c रथमिव वेद्यं शुक्रशोचिषमग्निं मित्रं न क्षितिषु प्रशंस्यम् ॥

2.002.03a tam̐ devā budhne rajasaḥ sudam̐sasam̐ divaspṛthivyor aratim̐ ny erire |
2.002.03c ratham iva vedyam̐ śukraśociṣam agnim mitram̐ na kṣitiṣu praśam̐syam ||

2.002.04a तमुक्षमाणं रजसि स्व आ दमे चन्द्रमिव सुरुचं ह्वार आ दधुः ।

2.002.04c पृश्न्याः पतरं चितयन्तमक्षभिः पाथो न पायुं जनसी उभे अनु ॥

2.002.04a tam ukṣamāṇam̐ rajasi sva ā dame candram iva surucam̐ hvāra ā dadhuḥ |
2.002.04c pṛśnyāḥ pataram̐ citayantam akṣabhiḥ pātho na pāyum̐ janasī ubhe anu ||

2.002.05a स होता विश्वं परि भूत्वध्वरं तमु हव्यैर्मनुष ऋञ्जते गिरा ।

2.002.05c हिरिशिप्रो वृधसानासु जर्भुरद्द्यौर्न स्तृभिश्चितयद्रोदसी अनु ॥

2.002.05a sa hotā viśvam pari bhūtv adhvaram̐ tam u havyair manuṣa ṛñjate girā |
2.002.05c hiriśipro vṛdhasānāsu jarbhurad dyaur na stṛbhiś citayad rodasī anu ||

2.002.06a स नो रेवत्समिधानः स्वस्तये संददस्वान्रयिमस्मासु दीदिहि ।

2.002.06c आ नः कृणुष्व सुविताय रोदसी अग्ने हव्या मनुषो देव वीतये ॥

2.002.06a sa no revat samidhānaḥ svastaye sandadasvān rayim asmāsu dīdihi |
2.002.06c ā naḥ kṛṇuṣva suvitāya rodasī agne havyā manuṣo deva vītaye ||

2.002.07a दा नो अग्ने बृहतो दाः सहस्रिणो दुरो न वाजं श्रुत्या अपा वृधि ।

2.002.07c प्राची द्यावापृथिवी ब्रह्मणा कृधि स्व१र्ण शुक्रमुषसो वि दिद्युतः ॥

2.002.07a dā no agne bṛhato dāḥ sahasriṇo duro na vājam̐ śrutyā apā vṛdhi |
2.002.07c prācī dyāvāpṛthivī brahmaṇā kṛdhi sva1r ṇa śukram uṣaso vi didyutaḥ ||

2.002.08a स इधान उषसो राम्या अनु स्व१र्ण दीदेदरुषेण भानुना ।

2.002.08c होत्राभिरग्निर्मनुषः स्वध्वरो राजा विशामतिथिश्चारुरायवे ॥

2.002.08a sa idhāna uṣaso rāmyā anu sva1r ṇa dīded aruṣeṇa bhānunā |
2.002.08c hotrābhir agnir manuṣaḥ svadhvaro rājā viśām atithiś cārur āyave ||

2.002.09a एवा नो अग्ने अमृतेषु पूर्व्य धीष्पीपाय बृहद्दिवेषु मानुषा ।

2.002.09c दुहाना धेनुर्वृजनेषु कारवे त्मना शतिनं पुरुरूपमिषणि ॥

2.002.09a evā no agne amṛteṣu pūrvya dhīṣ pīpāya bṛhaddiveṣu mānuṣā |

2.002.09c duhānā dhenur vṛjaneṣu kārave tmanā śatinam pururūpam iṣaṇi ||

2.002.10a वयमग्ने अर्वता वा सुवीर्यं ब्रह्मणा वा चितयेमा जनाँ अति ।

2.002.10c अस्माकं द्युम्नमधि पञ्च कृष्टिषूच्चा स्व१र्ण शुशुचीत दुष्टरम् ॥

2.002.10a vayam agne arvatā vā suvīryam brahmaṇā vā citayemā janāṁ ati |
2.002.10c asmākaṁ dyumnam adhi pañca kṛṣṭiṣūccā sva1r ṇa śuśucīta duṣṭaram ||

2.002.11a स नो बोधि सहस्य प्रशंस्यो यस्मिन्सुजाता इषयन्त सूरयः ।

2.002.11c यमग्ने यज्ञमुपयन्ति वाजिनो नित्ये तोके दीदिवांसं स्वे दमे ॥

2.002.11a sa no bodhi sahasya praśaṁsyo yasmin sujātā iṣayanta sūrayaḥ |
2.002.11c yam agne yajñam upayanti vājino nitye toke dīdivāṁsaṁ sve dame ||

2.002.12a उभयासो जातवेदः स्याम ते स्तोतारो अग्ने सूरयश्च शर्मणि ।

2.002.12c वस्वो रायः पुरुश्चन्द्रस्य भूयसः प्रजावतः स्वपत्यस्य शग्धि नः ॥

2.002.12a ubhayāso jātavedaḥ syāma te stotāro agne sūrayaś ca śarmaṇi |
2.002.12c vasvo rāyaḥ puruścandrasya bhūyasaḥ prajāvataḥ svapatyasya śagdhi naḥ ||

2.002.13a ये स्तोतृभ्यो गोअग्रामश्वपेशसमग्ने रातिमुपसृजन्ति सूरयः ।

2.002.13c अस्माञ्च ताँश्च प्र हि नेषि वस्य आ बृहद्वदेम विदथे सुवीराः ॥

2.002.13a ye stotṛbhyo goagrām aśvapeśasam agne rātim upasṛjanti sūrayaḥ |
2.002.13c asmāñ ca tāṁś ca pra hi neṣi vasya ā bṛhad vadema vidathe suvīrāḥ ||

2.003.01a समिद्धो अग्निर्निहितः पृथिव्यां प्रत्यङ्विश्वानि भुवनान्यस्थात् ।

2.003.01c होता पावकः प्रदिवः सुमेधा देवो देवान्यजत्वग्निरर्हन् ॥

2.003.01a samiddho agnir nihitaḥ pṛthivyām pratyaṅ viśvāni bhuvanāny asthāt |
2.003.01c hotā pāvakaḥ pradivaḥ sumedhā devo devān yajatv agnir arhan ||

2.003.02a नराशंसः प्रति धामान्यञ्जन्तिस्रो दिवः प्रति मह्ना स्वर्चिः ।

2.003.02c घृतप्रुषा मनसा हव्यमुन्दन्मूर्धन्यज्ञस्य समनक्तु देवान् ॥

2.003.02a narāśaṁsaḥ prati dhāmāny añjan tisro divaḥ prati mahnā svarciḥ |
2.003.02c ghṛtapruṣā manasā havyam undan mūrdhan yajñasya sam anaktu devān ||

2.003.03a ईळितो अग्ने मनसा नो अर्हन्देवान्यक्षि मानुषात्पूर्वो अद्य ।

2.003.03c स आ वह मरुतां शर्धो अच्युतमिन्द्रं नरो बर्हिषदं यजध्वम् ॥

2.003.03a īḷito agne manasā no arhan devān yakṣi mānuṣāt pūrvo adya |
2.003.03c sa ā vaha marutāṁ śardho acyutam indraṁ naro barhiṣadaṁ yajadhvam ||

2.003.04a देव बर्हिर्वर्धमानं सुवीरं स्तीर्णं राये सुभरं वेद्यस्याम् ।

2.003.04c घृतेनाक्तं वसवः सीदतेदं विश्वे देवा आदित्या यज्ञियासः ॥

2.003.04a deva barhir vardhamānaṁ suvīraṁ stīrṇaṁ rāye subharaṁ vedy asyām |
2.003.04c ghṛtenāktaṁ vasavaḥ sīdatedaṁ viśve devā ādityā yajñiyāsaḥ ||

2.003.05a वि श्रयन्तामुर्विया हूयमाना द्वारो देवीः सुप्रायणा नमोभिः ।

2.003.05c व्यचस्वतीर्वि प्रथन्तामजुर्या वर्णं पुनाना यशसं सुवीरम् ॥

2.003.05a vi śrayantām urviyā hūyamānā dvāro devīḥ suprāyaṇā namobhiḥ |
2.003.05c vyacasvatīr vi prathantām ajuryā varṇam punānā yaśasaṁ suvīram ||

2.003.06a साध्वपांसि सनता न उक्षिते उषासानक्ता वय्येव रण्विते ।

2.003.06c तन्तुं ततं संवयन्ती समीची यज्ञस्य पेशः सुदुघे पयस्वती ॥

2.003.06a sādhv apāṁsi sanatā na ukṣite uṣāsānaktā vayyeva raṇvite |
2.003.06c tantuṁ tataṁ saṁvayantī samīcī yajñasya peśaḥ sudughe payasvatī ||

2.003.07a दैव्या होतारा प्रथमा विदुष्टर ऋजु यक्षतः समृचा वपुष्टरा ।

2.003.07c देवान्यजन्तावृतुथा समञ्जतो नाभा पृथिव्या अधि सानुषु त्रिषु ॥

2.003.07a daivyā hotārā prathamā viduṣṭara ṛju yakṣataḥ sam ṛcā vapuṣṭarā |
2.003.07c devān yajantāv ṛtuthā sam añjato nābhā pṛthivyā adhi sānuṣu triṣu ||

2.003.08a सरस्वती साधयन्ती धियं न इळा देवी भारती विश्वतूर्तिः ।

2.003.08c तिस्रो देवीः स्वधया बर्हिरेदमच्छिद्रं पान्तु शरणं निषद्य ॥

2.003.08a sarasvatī sādhayantī dhiyaṁ na iḷā devī bhāratī viśvatūrtiḥ |
2.003.08c tisro devīḥ svadhayā barhir edam acchidram pāntu śaraṇaṁ niṣadya ||

2.003.09a पिशङ्गरूपः सुभरो वयोधाः श्रुष्टी वीरो जायते देवकामः ।

2.003.09c प्रजां त्वष्टा वि ष्यतु नाभिमस्मे अथा देवानामप्येतु पाथः ॥

2.003.09a piśaṅgarūpaḥ subharo vayodhāḥ śruṣṭī vīro jāyate devakāmaḥ |
2.003.09c prajāṁ tvaṣṭā vi ṣyatu nābhim asme athā devānām apy etu pāthaḥ ||

2.003.10a वनस्पतिरवसृजन्नुप स्थादग्निर्हविः सूदयाति प्र धीभिः ।

2.003.10c त्रिधा समक्तं नयतु प्रजानन्देवेभ्यो दैव्यः शमितोप हव्यम् ॥

2.003.10a vanaspatir avasṛjann upa sthād agnir haviḥ sūdayāti pra dhībhiḥ |
2.003.10c tridhā samaktaṁ nayatu prajānan devebhyo daivyaḥ śamitopa havyam ||

2.003.11a घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ।

2.003.11c अनुष्वधमा वह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् ॥

2.003.11a ghṛtam mimikṣe ghṛtam asya yonir ghṛte śrito ghṛtam v asya dhāma |
2.003.11c anuṣvadham ā vaha mādayasva svāhākṛtaṁ vṛṣabha vakṣi havyam ||

2.004.01a हुवे वः सुद्योत्मानं सुवृक्तिं विशामग्निमतिथिं सुप्रयसम् ।

2.004.01c मित्र इव यो दिधिषाय्यो भूद्देव आदेवे जने जातवेदाः ॥

2.004.01a huve vaḥ sudyotmānaṁ suvṛktiṁ viśām agnim atithiṁ suprayasam |
2.004.01c mitra iva yo didhiṣāyyo bhūd deva ādeve jane jātavedāḥ ||

2.004.02a इमं विधन्तो अपां सधस्थे द्वितादधुर्भृगवो विक्ष्वा३योः ।

2.004.02c एष विश्वान्यभ्यस्तु भूमा देवानामग्निररतिर्जीराश्वः ॥

2.004.02a imaṁ vidhanto apāṁ sadhasthe dvitādadhur bhṛgavo vikṣv ā3yoḥ |
2.004.02c eṣa viśvāny abhy astu bhūmā devānām agnir aratir jīrāśvaḥ ||

2.004.03a अग्निं देवासो मानुषीषु विक्षु प्रियं धुः क्षेष्यन्तो न मित्रम् ।

2.004.03c स दीदयदुशतीरूर्म्या आ दक्षाय्यो यो दास्वते दम आ ॥

2.004.03a agniṁ devāso mānuṣīṣu vikṣu priyaṁ dhuḥ kṣeṣyanto na mitram |
2.004.03c sa dīdayad uśatīr ūrmyā ā dakṣāyyo yo dāsvate dama ā ||

2.004.04a अस्य रण्वा स्वस्येव पुष्टिः संदृष्टिरस्य हियानस्य दक्षोः ।

2.004.04c वि यो भरिभ्रदोषधीषु जिह्वामत्यो न रथ्यो दोधवीति वारान् ॥

2.004.04a asya raṇvā svasyeva puṣṭiḥ sandṛṣṭir asya hiyānasya dakṣoḥ |
2.004.04c vi yo bharibhrad oṣadhīṣu jihvām atyo na rathyo dodhavīti vārān ||

2.004.05a आ यन्मे अभ्वं वनदः पनन्तोशिग्भ्यो नामिमीत वर्णम् ।

2.004.05c स चित्रेण चिकिते रंसु भासा जुजुर्वाँ यो मुहुरा युवा भूत् ॥

2.004.05a ā yan me abhvaṁ vanadaḥ panantośigbhyo nāmimīta varṇam |
2.004.05c sa citreṇa cikite raṁsu bhāsā jujurvāṁ̐ yo muhur ā yuvā bhūt ||

2.004.06a आ यो वना तातृषाणो न भाति वार्ण पथा रथ्येव स्वानीत् ।

2.004.06c कृष्णाध्वा तपू रण्वश्चिकेत द्यौरिव स्मयमानो नभोभिः ॥

2.004.06a ā yo vanā tātṛṣāṇo na bhāti vār ṇa pathā rathyeva svānīt |
2.004.06c kṛṣṇādhvā tapū raṇvaś ciketa dyaur iva smayamāno nabhobhiḥ ||

2.004.07a स यो व्यस्थादभि दक्षदुर्वीं पशुर्नैति स्वयुरगोपाः ।

2.004.07c अग्निः शोचिष्माँ अतसान्युष्णन्कृष्णव्यथिरस्वदयन्न भूम ॥

2.004.07a sa yo vy asthād abhi dakṣad urvīm paśur naiti svayur agopāḥ |
2.004.07c agniḥ śociṣmāṁ̐ atasāny uṣṇan kṛṣṇavyathir asvadayan na bhūma ||

2.004.08a नू ते पूर्वस्यावसो अधीतौ तृतीये विदथे मन्म शंसि ।

2.004.08c अस्मे अग्ने संयद्वीरं बृहन्तं क्षुमन्तं वाजं स्वपत्यं रयिं दाः ॥

2.004.08a nū te pūrvasyāvaso adhītau tṛtīye vidathe manma śaṁsi |
2.004.08c asme agne saṁyadvīram bṛhantaṁ kṣumantaṁ vājaṁ svapatyaṁ rayiṁ dāḥ ||

2.004.09a त्वया यथा गृत्समदासो अग्ने गुहा वन्वन्त उपराँ अभि ष्युः ।

2.004.09c सुवीरासो अभिमातिषाहः स्मत्सूरिभ्यो गृणते तद्वयो धाः ॥

2.004.09a tvayā yathā gṛtsamadāso agne guhā vanvanta uparāṁ̐ abhi ṣyuḥ |
2.004.09c suvīrāso abhimātiṣāhaḥ smat sūribhyo gṛṇate tad vayo dhāḥ ||

2.005.01a होताजनिष्ट चेतनः पिता पितृभ्य ऊतये ।

2.005.01c प्रयक्षञ्जेन्यं वसु शकेम वाजिनो यमम् ॥

2.005.01a hotājaniṣṭa cetanaḥ pitā pitṛbhya ūtaye |
2.005.01c prayakṣañ jenyaṁ vasu śakema vājino yamam ||

2.005.02a आ यस्मिन्सप्त रश्मयस्तता यज्ञस्य नेतरि ।

2.005.02c मनुष्वद्दैव्यमष्टमं पोता विश्वं तदिन्वति ॥

2.005.02a ā yasmin sapta raśmayas tatā yajñasya netari |
2.005.02c manuṣvad daivyam aṣṭamam potā viśvaṁ tad invati ||

2.005.03a दधन्वे वा यदीमनु वोचद्ब्रह्माणि वेरु तत् ।

2.005.03c परि विश्वानि काव्या नेमिश्चक्रमिवाभवत् ॥

2.005.03a dadhanve vā yad īm anu vocad brahmāṇi ver u tat |
2.005.03c pari viśvāni kāvyā nemiś cakram ivābhavat ||

2.005.04a साकं हि शुचिना शुचिः प्रशास्ता क्रतुनाजनि ।

2.005.04c विद्वाँ अस्य व्रता ध्रुवा वया इवानु रोहते ॥

2.005.04a sākaṁ hi śucinā śuciḥ praśāstā kratunājani |
2.005.04c vidvām̐ asya vratā dhruvā vayā ivānu rohate ||

2.005.05a ता अस्य वर्णमायुवो नेष्टुः सचन्त धेनवः ।

2.005.05c कुवित्तिसृभ्य आ वरं स्वसारो या इदं ययुः ॥

2.005.05a tā asya varṇam āyuvo neṣṭuḥ sacanta dhenavaḥ |
2.005.05c kuvit tisṛbhya ā varaṁ svasāro yā idaṁ yayuḥ ||

2.005.06a यदी मातुरुप स्वसा घृतं भरन्त्यस्थित ।

2.005.06c तासामध्वर्युरागतौ यवो वृष्टीव मोदते ॥

2.005.06a yadī mātur upa svasā ghṛtam bharanty asthita |
2.005.06c tāsām adhvaryur āgatau yavo vṛṣṭīva modate ||

2.005.07a स्वः स्वाय धायसे कृणुतामृत्विगृत्विजम् ।

2.005.07c स्तोमं यज्ञं चादरं वनेमा ररिमा वयम् ॥

2.005.07a svaḥ svāya dhāyase kṛṇutām ṛtvig ṛtvijam |
2.005.07c stomaṁ yajñaṁ cād araṁ vanemā rarimā vayam ||

2.005.08a यथा विद्वाँ अरं करद्विश्वेभ्यो यजतेभ्यः ।

2.005.08c अयमग्ने त्वे अपि यं यज्ञं चकृमा वयम् ॥

2.005.08a yathā vidvāṁ araṁ karad viśvebhyo yajatebhyaḥ |
2.005.08c ayam agne tve api yaṁ yajñaṁ cakṛmā vayam ||

2.006.01a इमां मे अग्ने समिधमिमामुपसदं वनेः ।

2.006.01c इमा उ षु श्रुधी गिरः ॥

2.006.01a imām me agne samidham imām upasadaṁ vaneḥ |
2.006.01c imā u ṣu śrudhī giraḥ ||

2.006.02a अया ते अग्ने विधेमोर्जो नपादश्वमिष्टे ।

2.006.02c एना सूक्तेन सुजात ॥

2.006.02a ayā te agne vidhemorjo napād aśvamiṣṭe |
2.006.02c enā sūktena sujāta ||

2.006.03a तं त्वा गीर्भिर्गिर्वणसं द्रविणस्युं द्रविणोदः ।

2.006.03c सपर्येम सपर्यवः ॥

2.006.03a taṁ tvā gīrbhir girvaṇasaṁ draviṇasyuṁ draviṇodaḥ |
2.006.03c saparyema saparyavaḥ ||

2.006.04a स बोधि सूरिर्मघवा वसुपते वसुदावन् ।

2.006.04c युयोध्य१स्मद्द्वेषांसि ॥

2.006.04a sa bodhi sūrir maghavā vasupate vasudāvan |
2.006.04c yuyodhy a1smad dveṣāṁsi ||

2.006.05a स नो वृष्टिं दिवस्परि स नो वाजमनर्वाणम् ।

2.006.05c स नः सहस्रिणीरिषः ॥

2.006.05a sa no vṛṣṭiṁ divas pari sa no vājam anarvāṇam |
2.006.05c sa naḥ sahasriṇīr iṣaḥ ||

2.006.06a ईळानायावस्यवे यविष्ठ दूत नो गिरा ।

2.006.06c यजिष्ठ होतरा गहि ॥

2.006.06a  īḻānāyāvasyave yaviṣṭha dūta no girā |
2.006.06c  yajiṣṭha hotar ā gahi ||

2.006.07a अन्तर्ह्यग्न ईयसे विद्वाञ्जन्मोभया कवे ।

2.006.07c दूतो जन्येव मित्र्यः ॥

2.006.07a  antar hy agna īyase vidvāñ janmobhayā kave |
2.006.07c  dūto janyeva mitryaḥ ||

2.006.08a स विद्वाँ आ च पिप्रयो यक्षि चिकित्व आनुषक् ।

2.006.08c आ चास्मिन्त्सत्सि बर्हिषि ॥

2.006.08a  sa vidvām̐ ā ca piprayo yakṣi cikitva ānuṣak |
2.006.08c  ā cāsmin satsi barhiṣi ||

2.007.01a श्रेष्ठं यविष्ठ भारताग्ने द्युमन्तमा भर ।

2.007.01c वसो पुरुस्पृहं रयिम् ॥

2.007.01a  śreṣṭhaṁ yaviṣṭha bhāratāgne dyumantam ā bhara |
2.007.01c  vaso puruspṛhaṁ rayim ||

2.007.02a मा नो अरातिरीशत देवस्य मर्त्यस्य च ।

2.007.02c पर्षि तस्या उत द्विषः ॥

2.007.02a  mā no arātir īśata devasya martyasya ca |
2.007.02c  parṣi tasyā uta dviṣaḥ ||

2.007.03a विश्वा उत त्वया वयं धारा उदन्या इव ।

2.007.03c अति गाहेमहि द्विषः ॥

2.007.03a  viśvā uta tvayā vayaṁ dhārā udanyā iva |
2.007.03c  ati gāhemahi dviṣaḥ ||

2.007.04a शुचिः पावक वन्द्योऽग्ने बृहद्वि रोचसे ।

2.007.04c त्वं घृतेभिराहुतः ॥

2.007.04a  śuciḥ pāvaka vandyo 'gne bṛhad vi rocase |
2.007.04c  tvaṁ ghṛtebhir āhutaḥ ||

2.007.05a त्वं नो असि भारताग्ने वशाभिरुक्षभिः ।

2.007.05c अष्टापदीभिराहुतः ॥

2.007.05a tvaṁ no asi bhāratāgne vaśābhir ukṣabhiḥ |
2.007.05c aṣṭāpadībhir āhutaḥ ||

2.007.06a द्र्वन्नः सर्पिरासुतिः प्रत्नो होता वरेण्यः ।

2.007.06c सहसस्पुत्रो अद्भुतः ॥

2.007.06a drvannaḥ sarpirāsutiḥ pratno hotā vareṇyaḥ |
2.007.06c sahasas putro adbhutaḥ ||

2.008.01a वाजयन्निव नू रथान्योगाँ अग्नेरुप स्तुहि ।

2.008.01c यशस्तमस्य मीळ्हुषः ॥

2.008.01a vājayann iva nū rathān yogām̐ agner upa stuhi |
2.008.01c yaśastamasya mīḷhuṣaḥ ||

2.008.02a यः सुनीथो ददाशुषेऽजुर्यो जरयन्नरिम् ।

2.008.02c चारुप्रतीक आहुतः ॥

2.008.02a yaḥ sunītho dadāśuṣe 'juryo jarayann arim |
2.008.02c cārupratīka āhutaḥ ||

2.008.03a य उ श्रिया दमेष्वा दोषोषसि प्रशस्यते ।

2.008.03c यस्य व्रतं न मीयते ॥

2.008.03a ya u śriyā dameṣv ā doṣoṣasi praśasyate |
2.008.03c yasya vrataṁ na mīyate ||

2.008.04a आ यः स्व१र्ण भानुना चित्रो विभात्यर्चिषा ।

2.008.04c अञ्जानो अजरैरभि ॥

2.008.04a ā yaḥ sva1r ṇa bhānunā citro vibhāty arciṣā |
2.008.04c añjāno ajarair abhi ||

2.008.05a अत्रिमनु स्वराज्यमग्निमुक्थानि वावृधुः ।

2.008.05c विश्वा अधि श्रियो दधे ॥

2.008.05a atrim anu svarājyam agnim ukthāni vāvṛdhuḥ |
2.008.05c viśvā adhi śriyo dadhe ||

2.008.06a अग्नेरिन्द्रस्य सोमस्य देवानामूतिभिर्वयम् ।

2.008.06c अरिष्यन्तः सचेमह्यभि ष्याम पृतन्यतः ॥

2.008.06a agner indrasya somasya devānām ūtibhir vayam |
2.008.06c ariṣyantaḥ sacemahy abhi ṣyāma pṛtanyataḥ ||

2.009.01a नि होता होतृषदने विदानस्त्वेषो दीदिवाँ असदत्सुदक्षः ।

2.009.01c अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रम्भरः शुचिजिह्वो अग्निः ॥

2.009.01a ni hotā hotṛṣadane vidānas tveṣo dīdivām̐ asadat sudakṣaḥ |
2.009.01c adabdhavratapramatir vasiṣṭhaḥ sahasrambharaḥ śucijihvo agniḥ ||

2.009.02a त्वं दूतस्त्वमु नः परस्पास्त्वं वस्य आ वृषभ प्रणेता ।

2.009.02c अग्ने तोकस्य नस्तने तनूनामप्रयुच्छन्दीद्यद्बोधि गोपाः ॥

2.009.02a tvaṁ dūtas tvam u naḥ paraspās tvaṁ vasya ā vṛṣabha praṇetā |
2.009.02c agne tokasya nas tane tanūnām aprayucchan dīdyad bodhi gopāḥ ||

2.009.03a विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे ।

2.009.03c यस्माद्योनेरुदारिथा यजे तं प्र त्वे हवींषि जुहुरे समिद्धे ॥

2.009.03a vidhema te parame janmann agne vidhema stomair avare sadhasthe |
2.009.03c yasmād yoner udārithā yaje tam pra tve havīṁṣi juhure samiddhe ||

2.009.04a अग्ने यजस्व हविषा यजीयाञ्छ्रुष्टी देष्णमभि गृणीहि राधः ।

2.009.04c त्वं ह्यसि रयिपती रयीणां त्वं शुक्रस्य वचसो मनोता ॥

2.009.04a agne yajasva haviṣā yajīyāñ chruṣṭī deṣṇam abhi gṛṇīhi rādhaḥ |
2.009.04c tvaṁ hy asi rayipatī rayīṇāṁ tvaṁ śukrasya vacaso manotā ||

2.009.05a उभयं ते न क्षीयते वसव्यं दिवेदिवे जायमानस्य दस्म ।

2.009.05c कृधि क्षुमन्तं जरितारमग्ने कृधि पतिं स्वपत्यस्य रायः ॥

2.009.05a ubhayaṁ te na kṣiyate vasavyaṁ dive-dive jāyamānasya dasma |
2.009.05c kṛdhi kṣumantaṁ jaritāram agne kṛdhi patiṁ svapatyasya rāyaḥ ||

2.009.06a सैनानीकेन सुविदत्रो अस्मे यष्टा देवाँ आयजिष्ठः स्वस्ति ।

2.009.06c अदब्धो गोपा उत नः परस्पा अग्ने द्युमदुत रेवद्दिदीहि ॥

2.009.06a sainānīkena suvidatro asme yaṣṭā devām̐ āyajiṣṭhaḥ svasti |
2.009.06c adabdho gopā uta naḥ paraspā agne dyumad uta revad didīhi ||

2.010.01a जोहूत्रो अग्निः प्रथमः पितेवेळस्पदे मनुषा यत्समिद्धः ।

2.010.01c श्रियं वसानो अमृतो विचेता मर्मृजेन्यः श्रवस्य१ः स वाजी ॥

2.010.01a johūtro agniḥ prathamaḥ pitevelas pade manuṣā yat samiddhaḥ |
2.010.01c śriyaṁ vasāno amṛto vicetā marmṛjenyaḥ śravasya1ḥ sa vājī ||

2.010.02a श्रूया अग्निश्चित्रभानुर्हवं मे विश्वाभिर्गीर्भिरमृतो विचेताः ।

2.010.02c श्यावा रथं वहतो रोहिता वोतारुषाह चक्रे विभृत्रः ॥

2.010.02a śrūyā agniś citrabhānur havaṁ me viśvābhir gīrbhir amṛto vicetāḥ |
2.010.02c śyāvā rathaṁ vahato rohitā votāruṣāha cakre vibhṛtraḥ ||

2.010.03a उत्तानायामजनयन्सुषूतं भुवदग्निः पुरुपेशासु गर्भः ।

2.010.03c शिरिणायां चिदक्तुना महोभिरपरीवृतो वसति प्रचेताः ॥

2.010.03a uttānāyām ajanayan suṣūtam bhuvad agniḥ purupeśāsu garbhaḥ |
2.010.03c śiriṇāyāṁ cid aktunā mahobhir aparīvṛto vasati pracetāḥ ||

2.010.04a जिघर्म्यग्निं हविषा घृतेन प्रतिक्षियन्तं भुवनानि विश्वा ।

2.010.04c पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्ठमन्नै रभसं दृशानम् ॥

2.010.04a jigharmy agniṁ haviṣā ghṛtena pratikṣiyantam bhuvanāni viśvā |
2.010.04c pṛthuṁ tiraścā vayasā bṛhantaṁ vyaciṣṭham annai rabhasaṁ dṛśānam ||

2.010.05a आ विश्वतः प्रत्यञ्चं जिघर्म्यरक्षसा मनसा तज्जुषेत ।

2.010.05c मर्यश्री स्पृहयद्वर्णो अग्निर्नाभिमृशे तन्वा३ जर्भुराणः ॥

2.010.05a ā viśvataḥ pratyañcaṁ jigharmy arakṣasā manasā taj juṣeta |
2.010.05c maryaśrī spṛhayadvarṇo agnir nābhimṛśe tanvā3 jarbhurāṇaḥ ||

2.010.06a ज्ञेया भागं सहसानो वरेण त्वादूतासो मनुवद्वदेम ।

2.010.06c अनूनमग्निं जुह्वा वचस्या मधुपृचं धनसा जोहवीमि ॥

2.010.06a jñeyā bhāgaṁ sahasāno vareṇa tvādūtāso manuvad vadema |
2.010.06c anūnam agniṁ juhvā vacasyā madhupṛcaṁ dhanasā johavīmi ||

2.011.01a श्रुधी हवमिन्द्र मा रिषण्यः स्याम ते दावने वसूनाम् ।

2.011.01c इमा हि त्वामूर्जो वर्धयन्ति वसूयवः सिन्धवो न क्षरन्तः ॥

2.011.01a śrudhī havam indra mā riṣaṇyaḥ syāma te dāvane vasūnām |
2.011.01c imā hi tvām ūrjo vardhayanti vasūyavaḥ sindhavo na kṣarantaḥ ||

2.011.02a सृजो महीरिन्द्र या अपिन्वः परिष्ठिता अहिना शूर पूर्वीः ।

2.011.02c अमर्त्यं चिद्दासं मन्यमानमवाभिनदुक्थैर्वावृधानः ॥

2.011.02a sṛjo mahīr indra yā apinvaḥ pariṣṭhitā ahinā śūra pūrvīḥ |
2.011.02c amartyaṁ cid dāsam manyamānam avābhinad ukthair vāvṛdhānaḥ ||

2.011.03a उक्थेष्विन्नु शूर येषु चाकन्स्तोमेष्विन्द्र रुद्रियेषु च ।

2.011.03c तुभ्येदेता यासु मन्दसानः प्र वायवे सिस्रते न शुभ्राः ॥

2.011.03a ukthesv in nu śūra yeṣu cākan stomeṣv indra rudriyeṣu ca |
2.011.03c tubhyed etā yāsu mandasānaḥ pra vāyave sisrate na śubhrāḥ ||

2.011.04a शुभ्रं नु ते शुष्मं वर्धयन्तः शुभ्रं वज्रं बाह्वोर्दधानाः ।

2.011.04c शुभ्रस्त्वमिन्द्र वावृधानो अस्मे दासीर्विशः सूर्येण सह्याः ॥

2.011.04a śubhraṁ nu te śuṣmaṁ vardhayantaḥ śubhraṁ vajraṁ bāhvor dadhānāḥ |
2.011.04c śubhras tvam indra vāvṛdhāno asme dāsīr viśaḥ sūryeṇa sahyāḥ ||

2.011.05a गुहा हितं गुह्यं गूळ्हमप्स्वपीवृतं मायिनं क्षियन्तम् ।

2.011.05c उतो अपो द्यां तस्तभ्वांसमहन्नहिं शूर वीर्येण ॥

2.011.05a guhā hitaṁ guhyaṁ gūḻham apsv apīvṛtam māyinaṁ kṣiyantam |
2.011.05c uto apo dyāṁ tastabhvāṁsam ahann ahiṁ śūra vīryeṇa ||

2.011.06a स्तवा नु त इन्द्र पूर्व्या महान्युत स्तवाम नूतना कृतानि ।

2.011.06c स्तवा वज्रं बाह्वोरुशन्तं स्तवा हरी सूर्यस्य केतू ॥

2.011.06a stavā nu ta indra pūrvyā mahāny uta stavāma nūtanā kṛtāni |
2.011.06c stavā vajram bāhvor uśantaṁ stavā harī sūryasya ketū ||

2.011.07a हरी नु त इन्द्र वाजयन्ता घृतश्चुतं स्वारमस्वार्ष्टाम् ।

2.011.07c वि समना भूमिरप्रथिष्टारंस्त पर्वतश्चित्सरिष्यन् ॥

2.011.07a harī nu ta indra vājayantā ghṛtaścutaṁ svāram asvārṣṭām |
2.011.07c vi samanā bhūmir aprathiṣṭāraṁsta parvataś cit sariṣyan ||

2.011.08a नि पर्वतः साद्यप्रयुच्छन्सं मातृभिर्वावशानो अक्रान् ।

2.011.08c दूरे पारे वाणीं वर्धयन्त इन्द्रेषितां धमनिं पप्रथन्नि ॥

2.011.08a ni parvataḥ sādy aprayucchan sam mātṛbhir vāvaśāno akrān |
2.011.08c dūre pāre vāṇīṁ vardhayanta indreṣitāṁ dhamanim paprathan ni ||

2.011.09a इन्द्रो महां सिन्धुमाशयानं मायाविनं वृत्रमस्फुरन्निः ।

2.011.09c अरेजेतां रोदसी भियाने कनिक्रदतो वृष्णो अस्य वज्रात् ॥

2.011.09a indro mahāṁ sindhum āśayānam māyāvinaṁ vṛtram asphuran niḥ |
2.011.09c arejetāṁ rodasī bhiyāne kanikradato vṛṣṇo asya vajrāt ||

2.011.10a अरोरवीद्वृष्णो अस्य वज्रोऽमानुषं यन्मानुषो निजूर्वात् ।

2.011.10c नि मायिनो दानवस्य माया अपादयत्पपिवान्सुतस्य ॥

2.011.10a aroravīd vṛṣṇo asya vajro 'mānuṣaṁ yan mānuṣo nijūrvāt |
2.011.10c ni māyino dānavasya māyā apādayat papivān sutasya ||

2.011.11a पिबापिबेदिन्द्र शूर सोमं मन्दन्तु त्वा मन्दिनः सुतासः ।

2.011.11c पृणन्तस्ते कुक्षी वर्धयन्त्वित्था सुतः पौर इन्द्रमाव ॥

2.011.11a pibā-pibed indra śūra somam mandantu tvā mandinaḥ sutāsaḥ |
2.011.11c pṛṇantas te kukṣī vardhayantv itthā sutaḥ paura indram āva ||

2.011.12a त्वे इन्द्राप्यभूम विप्रा धियं वनेम ऋतया सपन्तः ।

2.011.12c अवस्यवो धीमहि प्रशस्तिं सद्यस्ते रायो दावने स्याम ॥

2.011.12a tve indrāpy abhūma viprā dhiyaṁ vanema ṛtayā sapantaḥ |

2.011.12c  avasyavo dhīmahi praśastiṁ sadyas te rāyo dāvane syāma ||

2.011.13a स्याम ते त इन्द्र ये त ऊती अवस्यव ऊर्जं वर्धयन्तः ।

2.011.13c शुष्मिन्तमं यं चाकनाम देवास्मे रयिं रासि वीरवन्तम् ॥

2.011.13a  syāma te ta indra ye ta ūtī avasyava ūrjaṁ vardhayantaḥ |
2.011.13c  śuṣmintamaṁ yaṁ cākanāma devāsme rayiṁ rāsi vīravantam ||

2.011.14a रासि क्षयं रासि मित्रमस्मे रासि शर्ध इन्द्र मारुतं नः ।

2.011.14c सजोषसो ये च मन्दसानाः प्र वायवः पान्त्यग्रणीतिम् ॥

2.011.14a  rāsi kṣayaṁ rāsi mitram asme rāsi śardha indra mārutaṁ naḥ |
2.011.14c  sajoṣaso ye ca mandasānāḥ pra vāyavaḥ pānty agraṇītim ||

2.011.15a व्यन्त्विन्नु येषु मन्दसानस्तृपत्सोमं पाहि द्रह्यदिन्द्र ।

2.011.15c अस्मान्सु पृत्स्वा तरुत्रावर्धयो द्यां बृहद्भिरर्कैः ॥

2.011.15a  vyantv in nu yeṣu mandasānas tṛpat somaṁ pāhi drahyad indra |
2.011.15c  asmān su pṛtsv ā tarutrāvardhayo dyām bṛhadbhir arkaiḥ ||

2.011.16a बृहन्त इन्नु ये ते तरुत्रोक्थेभिर्वा सुम्नमाविवासान् ।

2.011.16c स्तृणानासो बर्हिः पस्त्यावत्त्वोता इदिन्द्र वाजमग्मन् ॥

2.011.16a  bṛhanta in nu ye te tarutrokthebhir vā sumnam āvivāsān |
2.011.16c  stṛṇānāso barhiḥ pastyāvat tvotā id indra vājam agman ||

2.011.17a उग्रेष्विन्नु शूर मन्दसानस्त्रिकद्रुकेषु पाहि सोममिन्द्र ।

2.011.17c प्रदोधुवच्छ्मश्रुषु प्रीणानो याहि हरिभ्यां सुतस्य पीतिम् ॥

2.011.17a  ugreṣv in nu śūra mandasānas trikadrukeṣu pāhi somam indra |
2.011.17c  pradodhuvac chmaśruṣu prīṇāno yāhi haribhyāṁ sutasya pītim ||

2.011.18a धिष्वा शवः शूर येन वृत्रमवाभिनद्दानुमौर्णवाभम् ।

2.011.18c अपावृणोर्ज्योतिरार्याय नि सव्यतः सादि दस्युरिन्द्र ॥

2.011.18a  dhiṣvā śavaḥ śūra yena vṛtram avābhinad dānum aurṇavābham |
2.011.18c  apāvṛṇor jyotir āryāya ni savyataḥ sādi dasyur indra ||

2.011.19a सनेम ये त ऊतिभिस्तरन्तो विश्वा स्पृध आर्येण दस्यून् ।

2.011.19c अस्मभ्यं तत्त्वाष्ट्रं विश्वरूपमरन्धयः साख्यस्य त्रिताय ॥

2.011.19a sanema ye ta ūtibhis taranto viśvā spṛdha āryeṇa dasyūn |
2.011.19c asmabhyaṁ tat tvāṣṭraṁ viśvarūpam arandhayaḥ sākhyasya tritāya ||

2.011.20a अस्य सुवानस्य मन्दिनस्त्रितस्य न्यर्बुदं वावृधानो अस्तः ।

2.011.20c अवर्तयत्सूर्यो न चक्रं भिनद्वलमिन्द्रो अङ्गिरस्वान् ॥

2.011.20a asya suvānasya mandinas tritasya ny arbudaṁ vāvṛdhāno astaḥ |
2.011.20c avartayat sūryo na cakram bhinad valam indro aṅgirasvān ||

2.011.21a नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।

2.011.21c शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥

2.011.21a nūnaṁ sā te prati varaṁ jaritre duhīyad indra dakṣiṇā maghonī |
2.011.21c śikṣā stotṛbhyo māti dhag bhago no bṛhad vadema vidathe suvīrāḥ ||

2.012.01a यो जात एव प्रथमो मनस्वान्देवो देवान्क्रतुना पर्यभूषत् ।

2.012.01c यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः ॥

2.012.01a yo jāta eva prathamo manasvān devo devān kratunā paryabhūṣat |
2.012.01c yasya śuṣmād rodasī abhyasetāṁ nṛmṇasya mahnā sa janāsa indraḥ ||

2.012.02a यः पृथिवीं व्यथमानामदृंहद्यः पर्वतान्प्रकुपिताँ अरम्णात् ।

2.012.02c यो अन्तरिक्षं विममे वरीयो यो द्यामस्तभ्नात्स जनास इन्द्रः ॥

2.012.02a yaḥ pṛthivīṁ vyathamānām adṛṁhad yaḥ parvatān prakupitām̐ aramṇāt |
2.012.02c yo antarikṣaṁ vimame varīyo yo dyām astabhnāt sa janāsa indraḥ ||

2.012.03a यो हत्वाहिमरिणात्सप्त सिन्धून्यो गा उदाजदपधा वलस्य ।

2.012.03c यो अश्मनोरन्तरग्निं जजान संवृक्समत्सु स जनास इन्द्रः ॥

2.012.03a yo hatvāhim ariṇāt sapta sindhūn yo gā udājad apadhā valasya |
2.012.03c yo aśmanor antar agniṁ jajāna saṁvṛk samatsu sa janāsa indraḥ ||

2.012.04a येनेमा विश्वा च्यवना कृतानि यो दासं वर्णमधरं गुहाकः ।

2.012.04c श्वघ्नीव यो जिगीवाँ लक्षमाददर्यः पुष्टानि स जनास इन्द्रः ॥

2.012.04a yenemā viśvā cyavanā kṛtāni yo dāsaṁ varṇam adharaṁ guhākaḥ |
2.012.04c śvaghnīva yo jigīvām̐ lakṣam ādad aryaḥ puṣṭāni sa janāsa indraḥ ||

2.012.05a यं स्मा पृच्छन्ति कुह सेति घोरमुतेमाहुर्नैषो अस्तीत्येनम्।

2.012.05c सो अर्यः पुष्टीर्विज इवा मिनाति श्रदस्मै धत्त स जनास इन्द्रः॥

2.012.05a yaṁ smā pṛcchanti kuha seti ghoram utem āhur naiṣo astīty enam |
2.012.05c so aryaḥ puṣṭīr vija ivā mināti śrad asmai dhatta sa janāsa indraḥ ||

2.012.06a यो रध्रस्य चोदिता यः कृशस्य यो ब्रह्मणो नाधमानस्य कीरेः।

2.012.06c युक्तग्राव्णो योऽविता सुशिप्रः सुतसोमस्य स जनास इन्द्रः॥

2.012.06a yo radhrasya coditā yaḥ kṛśasya yo brahmaṇo nādhamānasya kīreḥ |
2.012.06c yuktagrāvṇo yo 'vitā suśipraḥ sutasomasya sa janāsa indraḥ ||

2.012.07a यस्याश्वासः प्रदिशि यस्य गावो यस्य ग्रामा यस्य विश्वे रथासः।

2.012.07c यः सूर्यं य उषसं जजान यो अपां नेता स जनास इन्द्रः॥

2.012.07a yasyāśvāsaḥ pradiśi yasya gāvo yasya grāmā yasya viśve rathāsaḥ |
2.012.07c yaḥ sūryaṁ ya uṣasaṁ jajāna yo apāṁ netā sa janāsa indraḥ ||

2.012.08a यं क्रन्दसी संयती विह्वयेते परेऽवर उभया अमित्राः।

2.012.08c समानं चिद्रथमातस्थिवांसा नाना हवेते स जनास इन्द्रः॥

2.012.08a yaṁ krandasī saṁyatī vihvayete pare 'vara ubhayā amitrāḥ |
2.012.08c samānaṁ cid ratham ātasthivāṁsā nānā havete sa janāsa indraḥ ||

2.012.09a यस्मान्न ऋते विजयन्ते जनासो यं युध्यमाना अवसे हवन्ते।

2.012.09c यो विश्वस्य प्रतिमानं बभूव यो अच्युतच्युत्स जनास इन्द्रः॥

2.012.09a yasmān na ṛte vijayante janāso yaṁ yudhyamānā avase havante |
2.012.09c yo viśvasya pratimānam babhūva yo acyutacyut sa janāsa indraḥ ||

2.012.10a यः शश्वतो मह्येनो दधानानमन्यमानाञ्छर्वा जघान।

2.012.10c यः शर्धते नानुददाति शृध्यां यो दस्योर्हन्ता स जनास इन्द्रः॥

2.012.10a yaḥ śaśvato mahy eno dadhānān amanyamānāñ charvā jaghāna |
2.012.10c yaḥ śardhate nānudadāti śṛdhyāṁ yo dasyor hantā sa janāsa indraḥ ||

2.012.11a यः शम्बरं पर्वतेषु क्षियन्तं चत्वारिंश्यां शरद्यन्वविन्दत् ।

2.012.11c ओजायमानं यो अहिं जघान दानुं शयानं स जनास इन्द्रः ॥

2.012.11a yaḥ śambaram parvateṣu kṣiyantaṁ catvāriṁśyāṁ śarady anvavindat |
2.012.11c ojāyamānaṁ yo ahiṁ jaghāna dānuṁ śayānaṁ sa janāsa indraḥ ||

2.012.12a यः सप्तरश्मिर्वृषभस्तुविष्मानवासृजत्सर्तवे सप्त सिन्धून् ।

2.012.12c यो रौहिणमस्फुरद्वज्रबाहुर्द्यामारोहन्तं स जनास इन्द्रः ॥

2.012.12a yaḥ saptaraśmir vṛṣabhas tuviṣmān avāsṛjat sartave sapta sindhūn |
2.012.12c yo rauhiṇam asphurad vajrabāhur dyām ārohantaṁ sa janāsa indraḥ ||

2.012.13a द्यावा चिदस्मै पृथिवी नमेते शुष्माच्चिदस्य पर्वता भयन्ते ।

2.012.13c यः सोमपा निचितो वज्रबाहुर्यो वज्रहस्तः स जनास इन्द्रः ॥

2.012.13a dyāvā cid asmai pṛthivī namete śuṣmāc cid asya parvatā bhayante |
2.012.13c yaḥ somapā nicito vajrabāhur yo vajrahastaḥ sa janāsa indraḥ ||

2.012.14a यः सुन्वन्तमवति यः पचन्तं यः शंसन्तं यः शशमानमूती ।

2.012.14c यस्य ब्रह्म वर्धनं यस्य सोमो यस्येदं राधः स जनास इन्द्रः ॥

2.012.14a yaḥ sunvantam avati yaḥ pacantaṁ yaḥ śaṁsantaṁ yaḥ śaśamānam ūtī |
2.012.14c yasya brahma vardhanaṁ yasya somo yasyedaṁ rādhaḥ sa janāsa indraḥ ||

2.012.15a यः सुन्वते पचते दुध्र आ चिद्वाजं दर्दर्षि स किलासि सत्यः ।

2.012.15c वयं त इन्द्र विश्वह प्रियासः सुवीरासो विदथमा वदेम ॥

2.012.15a yaḥ sunvate pacate dudhra ā cid vājaṁ dardarṣi sa kilāsi satyaḥ |
2.012.15c vayaṁ ta indra viśvaha priyāsaḥ suvīrāso vidatham ā vadema ||

2.013.01a ऋतुर्जनित्री तस्या अपस्परि मक्षू जात आविशद्यासु वर्धते ।

2.013.01c तदाहना अभवत्पिप्युषी पयोऽंशोः पीयूषं प्रथमं तदुक्थ्यम् ॥

2.013.01a ṛtur janitrī tasyā apas pari makṣū jāta āviśad yāsu vardhate |
2.013.01c tad āhanā abhavat pipyuṣī payo 'ṁśoḥ pīyūṣam prathamaṁ tad ukthyam ||

2.013.02a सध्रीमा यन्ति परि बिभ्रतीः पयो विश्वप्स्न्याय प्र भरन्त भोजनम् ।

2.013.02c समानो अध्वा प्रवतामनुष्यदे यस्ताकृणोः प्रथमं सास्युक्थ्यः ॥

2.013.02a sadhrīm ā yanti pari bibhratīḥ payo viśvapsnyāya pra bharanta bhojanam |
2.013.02c samāno adhvā pravatām anuṣyade yas tākṛṇoḥ prathamaṁ sāsy ukthyaḥ ||

2.013.03a अन्वेको वदति यद्ददाति तद्रूपा मिनन्तदपा एक ईयते ।

2.013.03c विश्वा एकस्य विनुदस्तितिक्षते यस्ताकृणोः प्रथमं सास्युक्थ्यः ॥

2.013.03a anv eko vadati yad dadāti tad rūpā minan tadapā eka īyate |
2.013.03c viśvā ekasya vinudas titikṣate yas tākṛṇoḥ prathamaṁ sāsy ukthyaḥ ||

2.013.04a प्रजाभ्यः पुष्टिं विभजन्त आसते रयिमिव पृष्ठं प्रभवन्तमायते ।

2.013.04c असिन्वन्दंष्ट्रैः पितुरत्ति भोजनं यस्ताकृणोः प्रथमं सास्युक्थ्यः ॥

2.013.04a prajābhyaḥ puṣṭiṁ vibhajanta āsate rayim iva pṛṣṭham prabhavantam āyate |
2.013.04c asinvan daṁṣṭraiḥ pitur atti bhojanaṁ yas tākṛṇoḥ prathamaṁ sāsy ukthyaḥ ||

2.013.05a अधाकृणोः पृथिवीं संदृशे दिवे यो धौतीनामहिहन्नारिणक्पथः ।

2.013.05c तं त्वा स्तोमेभिरुदभिर्न वाजिनं देवं देवा अजनन्सास्युक्थ्यः ॥

2.013.05a adhākṛṇoḥ pṛthivīṁ sandṛśe dive yo dhautīnām ahihann āriṇak pathaḥ |
2.013.05c taṁ tvā stomebhir udabhir na vājinaṁ devaṁ devā ajanan sāsy ukthyaḥ ||

2.013.06a यो भोजनं च दयसे च वर्धनमार्द्रादा शुष्कं मधुमद्दुदोहिथ ।

2.013.06c स शेवधिं नि दधिषे विवस्वति विश्वस्यैक ईशिषे सास्युक्थ्यः ॥

2.013.06a yo bhojanaṁ ca dayase ca vardhanam ārdrād ā śuṣkam madhumad dudohitha |
2.013.06c sa śevadhiṁ ni dadhiṣe vivasvati viśvasyaika īśiṣe sāsy ukthyaḥ ||

2.013.07a यः पुष्पिणीश्च प्रस्वश्च धर्मणाधि दाने व्यश्वनीरधारयः ।

2.013.07c यश्चासमा अजनो दिद्युतो दिव उरुरूर्वाँ अभितः सास्युक्थ्यः ॥

2.013.07a yaḥ puṣpiṇīś ca prasvaś ca dharmaṇādhi dāne vy a1vanīr adhārayaḥ |
2.013.07c yaś cāsamā ajano didyuto diva urur ūrvām̐ abhitaḥ sāsy ukthyaḥ ||

2.013.08a यो नार्मरं सहवसुं निहन्तवे पृक्षाय च दासवेशाय चावहः ।

2.013.08c ऊर्जयन्त्या अपरिविष्टमास्यमुतैवाद्य पुरुकृत्सास्युक्थ्यः ॥

2.013.08a yo nārmaraṁ sahavasuṁ nihantave pṛkṣāya ca dāsaveśāya cāvahaḥ |

2.013.08c ūrjayantyā apariviṣṭam āsyam utaivādya purukṛt sāsy ukthyaḥ ||

2.013.09a शतं वा यस्य दश साकमाद्य एकस्य श्रुष्टौ यद्ध चोदमाविथ ।

2.013.09c अरज्जौ दस्यून्समुनब्दभीतये सुप्राव्यो अभवः सास्युक्थ्यः ॥

2.013.09a śataṁ vā yasya daśa sākam ādya ekasya śruṣṭau yad dha codam āvitha |
2.013.09c arajjau dasyūn sam unab dabhītaye suprāvyo abhavaḥ sāsy ukthyaḥ ||

2.013.10a विश्वेदनु रोधना अस्य पौंस्यं ददुरस्मै दधिरे कृत्नवे धनम् ।

2.013.10c षळस्तभ्ना विष्टिरः पञ्च संदृशः परि परो अभवः सास्युक्थ्यः ॥

2.013.10a viśved anu rodhanā asya pauṁsyaṁ dadur asmai dadhire kṛtnave dhanam |
2.013.10c ṣaḷ astabhnā viṣṭiraḥ pañca sandṛśaḥ pari paro abhavaḥ sāsy ukthyaḥ ||

2.013.11a सुप्रवाचनं तव वीर वीर्यं१ यदेकेन क्रतुना विन्दसे वसु ।

2.013.11c जातूष्ठिरस्य प्र वयः सहस्वतो या चकर्थ सेन्द्र विश्वास्युक्थ्यः ॥

2.013.11a supravācanaṁ tava vīra vīryaṁ1 yad ekena kratunā vindase vasu |
2.013.11c jātūṣṭhirasya pra vayaḥ sahasvato yā cakartha sendra viśvāsy ukthyaḥ ||

2.013.12a अरमयः सरपसस्तराय कं तुर्वीतये च वय्याय च स्रुतिम् ।

2.013.12c नीचा सन्तमुदनयः परावृजं प्रान्धं श्रोणं श्रवयन्सास्युक्थ्यः ॥

2.013.12a aramayaḥ sarapasas tarāya kaṁ turvītaye ca vayyāya ca srutim |
2.013.12c nīcā santam ud anayaḥ parāvṛjam prāndhaṁ śroṇaṁ śravayan sāsy ukthyaḥ ||

2.013.13a अस्मभ्यं तद्वसो दानाय राधः समर्थयस्व बहु ते वसव्यम् ।

2.013.13c इन्द्र यच्चित्रं श्रवस्या अनु द्यून्बृहद्वदेम विदथे सुवीराः ॥

2.013.13a asmabhyaṁ tad vaso dānāya rādhaḥ sam arthayasva bahu te vasavyam |
2.013.13c indra yac citraṁ śravasyā anu dyūn bṛhad vadema vidathe suvīrāḥ ||

2.014.01a अध्वर्यवो भरतेन्द्राय सोममामत्रेभिः सिञ्चता मद्यमन्धः ।

2.014.01c कामी हि वीरः सदमस्य पीतिं जुहोत वृष्णे तदिदेष वष्टि ॥

2.014.01a adhvaryavo bharatendrāya somam āmatrebhiḥ siñcatā madyam andhaḥ |
2.014.01c kāmī hi vīraḥ sadam asya pītiṁ juhota vṛṣṇe tad id eṣa vaṣṭi ||

2.014.02a अध्वर्यवो यो अपो वव्रिवांसं वृत्रं जघानाशन्येव वृक्षम् ।

2.014.02c तस्मा एतं भरत तद्वशायँ एष इन्द्रो अर्हति पीतिमस्य ॥

2.014.02a adhvaryavo yo apo vavrivāṁsaṁ vṛtraṁ jaghānāśanyeva vṛkṣam |
2.014.02c tasmā etam bharata tadvaśāyam̐ eṣa indro arhati pītim asya ||

2.014.03a अध्वर्यवो यो दृभीकं जघान यो गा उदाजदप हि वलं वः ।

2.014.03c तस्मा एतमन्तरिक्षे न वातमिन्द्रं सोमैरोर्णुत जूर्न वस्त्रैः ॥

2.014.03a adhvaryavo yo dṛbhīkaṁ jaghāna yo gā udājad apa hi valaṁ vaḥ |
2.014.03c tasmā etam antarikṣe na vātam indraṁ somair orṇuta jūr na vastraiḥ ||

2.014.04a अध्वर्यवो य उरणं जघान नव चख्वांसं नवतिं च बाहून् ।

2.014.04c यो अर्बुदमव नीचा बबाधे तमिन्द्रं सोमस्य भृथे हिनोत ॥

2.014.04a adhvaryavo ya uraṇaṁ jaghāna nava cakhvāṁsaṁ navatiṁ ca bāhūn |
2.014.04c yo arbudam ava nīcā babādhe tam indraṁ somasya bhṛthe hinota ||

2.014.05a अध्वर्यवो यः स्वश्नं जघान यः शुष्णमशुषं यो व्यंसम् ।

2.014.05c यः पिप्रुं नमुचिं यो रुधिक्रां तस्मा इन्द्रायान्धसो जुहोत ॥

2.014.05a adhvaryavo yaḥ sv aśnaṁ jaghāna yaḥ śuṣṇam aśuṣaṁ yo vyaṁsam |
2.014.05c yaḥ pipruṁ namuciṁ yo rudhikrāṁ tasmā indrāyāndhaso juhota ||

2.014.06a अध्वर्यवो यः शतं शम्बरस्य पुरो बिभेदाश्मनेव पूर्वीः ।

2.014.06c यो वर्चिनः शतमिन्द्रः सहस्रमपावपद्भरता सोममस्मै ॥

2.014.06a adhvaryavo yaḥ śataṁ śambarasya puro bibhedāśmaneva pūrvīḥ |
2.014.06c yo varcinaḥ śatam indraḥ sahasram apāvapad bharatā somam asmai ||

2.014.07a अध्वर्यवो यः शतमा सहस्रं भूम्या उपस्थेऽवपज्जघन्वान् ।

2.014.07c कुत्सस्यायोरतिथिग्वस्य वीरान्न्यावृणग्भरता सोममस्मै ॥

2.014.07a adhvaryavo yaḥ śatam ā sahasram bhūmyā upasthe 'vapaj jaghanvān |
2.014.07c kutsasyāyor atithigvasya vīrān ny āvṛṇag bharatā somam asmai ||

2.014.08a अध्वर्यवो यन्नरः कामयाध्वे श्रुष्टी वहन्तो नशथा तदिन्द्रे ।

2.014.08c गभस्तिपूतं भरत श्रुतायेन्द्राय सोमं यज्यवो जुहोत ॥

2.014.08a adhvaryavo yan naraḥ kāmayādhve śruṣṭī vahanto naśathā tad indre |
2.014.08c gabhastipūtam bharata śrutāyendrāya somaṁ yajyavo juhota ||

2.014.09a अध्वर्यवः कर्तना श्रुष्टिमस्मै वने निपूतं वन उन्नयध्वम् ।

2.014.09c जुषाणो हस्त्यमभि वावशे व इन्द्राय सोमं मदिरं जुहोत ॥

2.014.09a adhvaryavaḥ kartanā śruṣṭim asmai vane nipūtaṁ vana un nayadhvam |
2.014.09c juṣāṇo hastyam abhi vāvaśe va indrāya somaṁ madiraṁ juhota ||

2.014.10a अध्वर्यवः पयसोधर्यथा गोः सोमेभिरीं पृणता भोजमिन्द्रम् ।

2.014.10c वेदाहमस्य निभृतं म एतद्दित्सन्तं भूयो यजतश्चिकेत ॥

2.014.10a adhvaryavaḥ payasodhar yathā goḥ somebhir īm pṛṇatā bhojam indram |
2.014.10c vedāham asya nibhṛtam ma etad ditsantam bhūyo yajataś ciketa ||

2.014.11a अध्वर्यवो यो दिव्यस्य वस्वो यः पार्थिवस्य क्षम्यस्य राजा ।

2.014.11c तमूर्दरं न पृणता यवेनेन्द्रं सोमेभिस्तदपो वो अस्तु ॥

2.014.11a adhvaryavo yo divyasya vasvo yaḥ pārthivasya kṣamyasya rājā |
2.014.11c tam ūrdaraṁ na pṛṇatā yavenendraṁ somebhis tad apo vo astu ||

2.014.12a अस्मभ्यं तद्वसो दानाय राधः समर्थयस्व बहु ते वसव्यम् ।

2.014.12c इन्द्र यच्चित्रं श्रवस्या अनु द्यून्बृहद्वदेम विदथे सुवीराः ॥

2.014.12a asmabhyaṁ tad vaso dānāya rādhaḥ sam arthayasva bahu te vasavyam |
2.014.12c indra yac citraṁ śravasyā anu dyūn bṛhad vadema vidathe suvīrāḥ ||

2.015.01a प्र घा न्वस्य महतो महानि सत्या सत्यस्य करणानि वोचम् ।

2.015.01c त्रिकद्रुकेष्वपिबत्सुतस्यास्य मदे अहिमिन्द्रो जघान ॥

2.015.01a pra ghā nv asya mahato mahāni satyā satyasya karaṇāni vocam |
2.015.01c trikadrukeṣv apibat sutasyāsya made ahim indro jaghāna ||

2.015.02a अवंशे द्यामस्तभायद्बृहन्तमा रोदसी अपृणदन्तरिक्षम् ।

2.015.02c स धारयत्पृथिवीं पप्रथच्च सोमस्य ता मद इन्द्रश्चकार ॥

2.015.02a avaṁśe dyām astabhāyad bṛhantam ā rodasī apṛṇad antarikṣam |
2.015.02c sa dhārayat pṛthivīm paprathac ca somasya tā mada indraś cakāra ||

2.015.03a सद्मेव प्राचो वि मिमाय मानैर्वज्रेण खान्यतृणन्नदीनाम् ।
2.015.03c वृथासृजत्पथिभिर्दीर्घयाथैः सोमस्य ता मद इन्द्रश्चकार ॥

2.015.03a sadmeva prāco vi mimāya mānair vajreṇa khāny atṛṇan nadīnām |
2.015.03c vṛthāsṛjat pathibhir dīrghayāthaiḥ somasya tā mada indraś cakāra ||

2.015.04a स प्रवोळ्हॄन्परिगत्या दभीतेर्विश्वमधागायुधमिद्धे अग्नौ ।
2.015.04c सं गोभिरश्वैरसृजद्रथेभिः सोमस्य ता मद इन्द्रश्चकार ॥

2.015.04a sa pravolhṝn parigatyā dabhīter viśvam adhāg āyudham iddhe agnau |
2.015.04c saṁ gobhir aśvair asṛjad rathebhiḥ somasya tā mada indraś cakāra ||

2.015.05a स ईं महीं धुनिमेतोररम्णात्सो अस्नातॄनपारयत्स्वस्ति ।
2.015.05c त उत्स्नाय रयिमभि प्र तस्थुः सोमस्य ता मद इन्द्रश्चकार ॥

2.015.05a sa īm mahīṁ dhunim etor aramṇāt so asnātṝn apārayat svasti |
2.015.05c ta utsnāya rayim abhi pra tasthuḥ somasya tā mada indraś cakāra ||

2.015.06a सोदञ्चं सिन्धुमरिणान्महित्वा वज्रेणान उषसः सं पिपेष ।
2.015.06c अजवसो जविनीभिर्विवृश्चन्सोमस्य ता मद इन्द्रश्चकार ॥

2.015.06a sodañcaṁ sindhum ariṇān mahitvā vajreṇāna uṣasaḥ sam pipeṣa |
2.015.06c ajavaso javinībhir vivṛścan somasya tā mada indraś cakāra ||

2.015.07a स विद्वाँ अपगोहं कनीनामाविर्भवन्नुदतिष्ठत्परावृक् ।
2.015.07c प्रति श्रोण स्थाद्व्यश्नगचष्ट सोमस्य ता मद इन्द्रश्चकार ॥

2.015.07a sa vidvām̐ apagohaṁ kanīnām āvir bhavann ud atiṣṭhat parāvṛk |
2.015.07c prati śroṇa sthād vy a1nag acaṣṭa somasya tā mada indraś cakāra ||

2.015.08a भिनद्वलमङ्गिरोभिर्गृणानो वि पर्वतस्य दृंहितान्यैरत् ।
2.015.08c रिणग्रोधांसि कृत्रिमाण्येषां सोमस्य ता मद इन्द्रश्चकार ॥

2.015.08a bhinad valam aṅgirobhir gṛṇāno vi parvatasya dṛṁhitāny airat |
2.015.08c riṇag rodhāṁsi kṛtrimāṇy eṣāṁ somasya tā mada indraś cakāra ||

2.015.09a स्वप्नेनाभ्युप्या चुमुरिं धुनिं च जघन्थ दस्युं प्र दभीतिमावः ।

2.015.09c रम्भी चिदत्र विविदे हिरण्यं सोमस्य ता मद इन्द्रश्चकार ॥

2.015.09a svapnenābhyupyā cumuriṁ dhuniṁ ca jaghantha dasyum pra dabhītim āvaḥ |
2.015.09c rambhī cid atra vivide hiraṇyaṁ somasya tā mada indraś cakāra ||

2.015.10a नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।

2.015.10c शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥

2.015.10a nūnaṁ sā te prati varaṁ jaritre duhīyad indra dakṣiṇā maghonī |
2.015.10c śikṣā stotṛbhyo māti dhag bhago no bṛhad vadema vidathe suvīrāḥ ||

2.016.01a प्र वः सतां ज्येष्ठतमाय सुष्टुतिमग्नाविव समिधाने हविर्भरे ।

2.016.01c इन्द्रमजुर्यं जरयन्तमुक्षितं सनाद्युवानमवसे हवामहे ॥

2.016.01a pra vaḥ satāṁ jyeṣṭhatamāya suṣṭutim agnāv iva samidhāne havir bhare |
2.016.01c indram ajuryaṁ jarayantam ukṣitaṁ sanād yuvānam avase havāmahe ||

2.016.02a यस्मादिन्द्राद्बृहतः किं चनेमृते विश्वान्यस्मिन्सम्भृताधि वीर्या ।

2.016.02c जठरे सोमं तन्वी३ सहो महो हस्ते वज्रं भरति शीर्षणि क्रतुम् ॥

2.016.02a yasmād indrād bṛhataḥ kiṁ canem ṛte viśvāny asmin sambhṛtādhi vīryā |
2.016.02c jaṭhare somaṁ tanvī3 saho maho haste vajram bharati śīrṣaṇi kratum ||

2.016.03a न क्षोणीभ्यां परिभ्वे त इन्द्रियं न समुद्रैः पर्वतैरिन्द्र ते रथः ।

2.016.03c न ते वज्रमन्वश्नोति कश्चन यदाशुभिः पतसि योजना पुरु ॥

2.016.03a na kṣoṇībhyām paribhve ta indriyaṁ na samudraiḥ parvatair indra te rathaḥ |
2.016.03c na te vajram anv aśnoti kaś cana yad āśubhiḥ patasi yojanā puru ||

2.016.04a विश्वे ह्यस्मै यजताय धृष्णवे क्रतुं भरन्ति वृषभाय सश्चते ।

2.016.04c वृषा यजस्व हविषा विदुष्टरः पिबेन्द्र सोमं वृषभेण भानुना ॥

2.016.04a viśve hy asmai yajatāya dhṛṣṇave kratum bharanti vṛṣabhāya saścate |
2.016.04c vṛṣā yajasva haviṣā viduṣṭaraḥ pibendra somaṁ vṛṣabheṇa bhānunā ||

2.016.05a वृष्णः कोशः पवते मध्व ऊर्मिर्वृषभान्नाय वृषभाय पातवे ।

2.016.05c वृषणाध्वर्यू वृषभासो अद्रयो वृषणं सोमं वृषभाय सुष्वति ॥

2.016.05a vṛṣṇaḥ kośaḥ pavate madhva ūrmir vṛṣabhānnāya vṛṣabhāya pātave |
2.016.05c vṛṣaṇādhvaryū vṛṣabhāso adrayo vṛṣaṇaṁ somaṁ vṛṣabhāya suṣvati ||

2.016.06a वृषा ते वज्र उत ते वृषा रथो वृषणा हरी वृषभाण्यायुधा ।

2.016.06c वृष्णो मदस्य वृषभ त्वमीशिष इन्द्र सोमस्य वृषभस्य तृप्णुहि ॥

2.016.06a vṛṣā te vajra uta te vṛṣā ratho vṛṣaṇā harī vṛṣabhāṇy āyudhā |
2.016.06c vṛṣṇo madasya vṛṣabha tvam īśiṣa indra somasya vṛṣabhasya tṛpṇuhi ||

2.016.07a प्र ते नावं न समने वचस्युवं ब्रह्मणा यामि सवनेषु दाधृषिः ।

2.016.07c कुविन्नो अस्य वचसो निबोधिषदिन्द्रमुत्सं न वसुनः सिचामहे ॥

2.016.07a pra te nāvaṁ na samane vacasyuvam brahmaṇā yāmi savaneṣu dādhṛṣiḥ |
2.016.07c kuvin no asya vacaso nibodhiṣad indram utsaṁ na vasunaḥ sicāmahe ||

2.016.08a पुरा सम्बाधादभ्या ववृत्स्व नो धेनुर्न वत्सं यवसस्य पिप्युषी ।

2.016.08c सकृत्सु ते सुमतिभिः शतक्रतो सं पत्नीभिर्न वृषणो नसीमहि ॥

2.016.08a purā sambādhād abhy ā vavṛtsva no dhenur na vatsaṁ yavasasya pipyuṣī |
2.016.08c sakṛt su te sumatibhiḥ śatakrato sam patnībhir na vṛṣaṇo nasīmahi ||

2.016.09a नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।

2.016.09c शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥

2.016.09a nūnaṁ sā te prati varaṁ jaritre duhīyad indra dakṣiṇā maghonī |
2.016.09c śikṣā stotṛbhyo māti dhag bhago no bṛhad vadema vidathe suvīrāḥ ||

2.017.01a तदस्मै नव्यमङ्गिरस्वदर्चत शुष्मा यदस्य प्रत्नथोदीरते ।

2.017.01c विश्वा यद्गोत्रा सहसा परीवृता मदे सोमस्य दृंहितान्यैरयत् ॥

2.017.01a tad asmai navyam aṅgirasvad arcata śuṣmā yad asya pratnathodīrate |
2.017.01c viśvā yad gotrā sahasā parīvṛtā made somasya dṛṁhitāny airayat ||

2.017.02a स भूतु यो ह प्रथमाय धायस ओजो मिमानो महिमानमातिरत् ।

2.017.02c शूरो यो युत्सु तन्वं परिव्यत शीर्षणि द्यां महिना प्रत्यमुञ्चत ॥

2.017.02a sa bhūtu yo ha prathamāya dhāyasa ojo mimāno mahimānam ātirat |
2.017.02c śūro yo yutsu tanvam parivyata śīrṣaṇi dyām mahinā praty amuñcata ||

2.017.03a अधाकृणोः प्रथमं वीर्यं महद्यदस्याग्रे ब्रह्मणा शुष्ममैरयः ।

2.017.03c रथेष्ठेन हर्यश्वेन विच्युताः प्र जीरयः सिस्रते सध्र्य१क्पृथक् ॥

2.017.03a adhākṛṇoḥ prathamaṁ vīryam mahad yad asyāgre brahmaṇā śuṣmam airayaḥ |
2.017.03c ratheṣṭhena haryaśvena vicyutāḥ pra jīrayaḥ sisrate sadhrya1k pṛthak ||

2.017.04a अधा यो विश्वा भुवनाभि मज्मनेशानकृत्प्रवया अभ्यवर्धत ।

2.017.04c आद्रोदसी ज्योतिषा वह्निरातनोत्सीव्यन्तमांसि दुधिता समव्ययत् ॥

2.017.04a adhā yo viśvā bhuvanābhi majmaneśānakṛt pravayā abhy avardhata |
2.017.04c ād rodasī jyotiṣā vahnir ātanot sīvyan tamāṁsi dudhitā sam avyayat ||

2.017.05a स प्राचीनान्पर्वतान्दृंहदोजसाधराचीनमकृणोदपामपः ।

2.017.05c अधारयत्पृथिवीं विश्वधायसमस्तभ्नान्मायया द्यामवस्रसः ॥

2.017.05a sa prācīnān parvatān dṛṁhad ojasādharācīnam akṛṇod apām apaḥ |
2.017.05c adhārayat pṛthivīṁ viśvadhāyasam astabhnān māyayā dyām avasrasaḥ ||

2.017.06a सास्मा अरं बाहुभ्यां यं पिताकृणोद्विश्वस्मादा जनुषो वेदसस्परि ।

2.017.06c येना पृथिव्यां नि क्रिविं शयध्यै वज्रेण हत्व्यवृणक्तुविष्वणिः ॥

2.017.06a sāsmā aram bāhubhyāṁ yam pitākṛṇod viśvasmād ā januṣo vedasas pari |
2.017.06c yenā pṛthivyāṁ ni kriviṁ śayadhyai vajreṇa hatvy avṛṇak tuviṣvaṇiḥ ||

2.017.07a अमाजूरिव पित्रोः सचा सती समानादा सदसस्त्वामिये भगम् ।

2.017.07c कृधि प्रकेतमुप मास्या भर दद्धि भागं तन्वो३ येन मामहः ॥

2.017.07a amājūr iva pitroḥ sacā satī samānād ā sadasas tvām iye bhagam |
2.017.07c kṛdhi praketam upa māsy ā bhara daddhi bhāgaṁ tanvo3 yena māmahaḥ ||

2.017.08a भोजं त्वामिन्द्र वयं हुवेम ददिष्ट्वमिन्द्रापांसि वाजान् ।

2.017.08c अविड्ढीन्द्र चित्रया न ऊती कृधि वृषन्निन्द्र वस्यसो नः ॥

2.017.08a bhojaṁ tvām indra vayaṁ huvema dadiṣ ṭvam indrāpāṁsi vājān |
2.017.08c aviḍḍhīndra citrayā na ūtī kṛdhi vṛṣann indra vasyaso naḥ ||

2.017.09a नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।

2.017.09c शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥

2.017.09a nūnaṁ sā te prati varaṁ jaritre duhīyad indra dakṣiṇā maghonī |
2.017.09c śikṣā stotṛbhyo māti dhag bhago no bṛhad vadema vidathe suvīrāḥ ||

2.018.01a प्राता रथो नवो योजि सस्निश्चतुर्युगस्त्रिकशः सप्तरश्मिः ।

2.018.01c दशारित्रो मनुष्यः स्वर्षाः स इष्टिभिर्मतिभी रंह्यो भूत् ॥

2.018.01a prātā ratho navo yoji sasniś caturyugas trikaśaḥ saptaraśmiḥ |
2.018.01c daśāritro manuṣyaḥ svarṣāḥ sa iṣṭibhir matibhī raṁhyo bhūt ||

2.018.02a सास्मा अरं प्रथमं स द्वितीयमुतो तृतीयं मनुषः स होता ।

2.018.02c अन्यस्या गर्भमन्य ऊ जनन्त सो अन्येभिः सचते जेन्यो वृषा ॥

2.018.02a sāsmā aram prathamaṁ sa dvitīyam uto tṛtīyam manuṣaḥ sa hotā |
2.018.02c anyasyā garbham anya ū jananta so anyebhiḥ sacate jenyo vṛṣā ||

2.018.03a हरी नु कं रथ इन्द्रस्य योजमायै सूक्तेन वचसा नवेन ।

2.018.03c मो षु त्वामत्र बहवो हि विप्रा नि रीरमन्यजमानासो अन्ये ॥

2.018.03a harī nu kaṁ ratha indrasya yojam āyai sūktena vacasā navena |
2.018.03c mo ṣu tvām atra bahavo hi viprā ni rīraman yajamānāso anye ||

2.018.04a आ द्वाभ्यां हरिभ्यामिन्द्र याह्या चतुर्भिरा षड्भिर्हूयमानः ।

2.018.04c आष्टाभिर्दशभिः सोमपेयमयं सुतः सुमख मा मृधस्कः ॥

2.018.04a ā dvābhyāṁ haribhyām indra yāhy ā caturbhir ā ṣaḍbhir hūyamānaḥ |
2.018.04c āṣṭābhir daśabhiḥ somapeyam ayaṁ sutaḥ sumakha mā mṛdhas kaḥ ||

2.018.05a आ विंशत्या त्रिंशता याह्यर्वाङा चत्वारिंशता हरिभिर्युजानः ।

2.018.05c आ पञ्चाशता सुरथेभिरिन्द्रा षष्ट्या सप्तत्या सोमपेयम् ॥

2.018.05a ā viṁśatyā triṁśatā yāhy arvāṅ ā catvāriṁśatā haribhir yujānaḥ |
2.018.05c ā pañcāśatā surathebhir indrā ṣaṣṭyā saptatyā somapeyam ||

2.018.06a आशीत्या नवत्या याह्यर्वाङा शतेन हरिभिरुह्यमानः ।

2.018.06c अयं हि ते शुनहोत्रेषु सोम इन्द्र त्वाया परिषिक्तो मदाय ॥

2.018.06a āśītyā navatyā yāhy arvāṅ ā śatena haribhir uhyamānaḥ |
2.018.06c ayaṁ hi te śunahotreṣu soma indra tvāyā pariṣikto madāya ||

2.018.07a मम ब्रह्मेन्द्र याह्यच्छा विश्वा हरी धुरि धिष्वा रथस्य ।

2.018.07c पुरुत्रा हि विहव्यो बभूथास्मिञ्छूर सवने मादयस्व ॥

2.018.07a mama brahmendra yāhy acchā viśvā harī dhuri dhiṣvā rathasya |
2.018.07c purutrā hi vihavyo babhūthāsmiñ chūra savane mādayasva ||

2.018.08a न म इन्द्रेण सख्यं वि योषदस्मभ्यमस्य दक्षिणा दुहीत ।

2.018.08c उप ज्येष्ठे वरूथे गभस्तौ प्रायेप्राये जिगीवांसः स्याम ॥

2.018.08a na ma indreṇa sakhyaṁ vi yoṣad asmabhyam asya dakṣiṇā duhīta |
2.018.08c upa jyeṣṭhe varūthe gabhastau prāye-prāye jigīvāṁsaḥ syāma ||

2.018.09a नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।

2.018.09c शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥

2.018.09a nūnaṁ sā te prati varaṁ jaritre duhīyad indra dakṣiṇā maghonī |
2.018.09c śikṣā stotṛbhyo māti dhag bhago no bṛhad vadema vidathe suvīrāḥ ||

2.019.01a अपाय्यस्यान्धसो मदाय मनीषिणः सुवानस्य प्रयसः ।

2.019.01c यस्मिन्निन्द्रः प्रदिवि वावृधान ओको दधे ब्रह्मण्यन्तश्च नरः ॥

2.019.01a apāyy asyāndhaso madāya manīṣiṇaḥ suvānasya prayasaḥ |
2.019.01c yasminn indraḥ pradivi vāvṛdhāna oko dadhe brahmaṇyantaś ca naraḥ ||

2.019.02a अस्य मन्दानो मध्वो वज्रहस्तोऽहिमिन्द्रो अर्णोवृतं वि वृश्चत् ।

2.019.02c प्र यद्वयो न स्वसराण्यच्छा प्रयांसि च नदीनां चक्रमन्त ॥

2.019.02a asya mandāno madhvo vajrahasto 'him indro arṇovṛtaṁ vi vṛścat |
2.019.02c pra yad vayo na svasarāṇy acchā prayāṁsi ca nadīnāṁ cakramanta ||

2.019.03a स माहिन इन्द्रो अर्णो अपां प्रैरयदहिहाच्छा समुद्रम् ।

2.019.03c अजनयत्सूर्यं विदद्गा अक्तुनाह्नां वयुनानि साधत् ॥

2.019.03a sa māhina indro arṇo apām prairayad ahihācchā samudram |
2.019.03c ajanayat sūryaṁ vidad gā aktunāhnāṁ vayunāni sādhat ||

2.019.04a सो अप्रतीनि मनवे पुरूणीन्द्रो दाशद्दाशुषे हन्ति वृत्रम् ।

2.019.04c सद्यो यो नृभ्यो अतसाय्यो भूत्पस्पृधानेभ्यः सूर्यस्य सातौ ॥

2.019.04a so apratīni manave purūṇīndro dāśad dāśuṣe hanti vṛtram |
2.019.04c sadyo yo nṛbhyo atasāyyo bhūt paspṛdhānebhyaḥ sūryasya sātau ||

2.019.05a स सुन्वत इन्द्रः सूर्यमा देवो रिणङ्मर्त्याय स्तवान् ।

2.019.05c आ यद्रयिं गुहदवद्यमस्मै भरदंशं नैतशो दशस्यन् ॥

2.019.05a sa sunvata indraḥ sūryam ā devo riṇaṅ martyāya stavān |
2.019.05c ā yad rayiṁ guhadavadyam asmai bharad aṁśaṁ naitaśo daśasyan ||

2.019.06a स रन्धयत्सदिवः सारथये शुष्णमशुषं कुयवं कुत्साय ।

2.019.06c दिवोदासाय नवतिं च नवेन्द्रः पुरो व्यैरच्छम्बरस्य ॥

2.019.06a sa randhayat sadivaḥ sārathaye śuṣṇam aśuṣaṁ kuyavaṁ kutsāya |
2.019.06c divodāsāya navatiṁ ca navendraḥ puro vy airac chambarasya ||

2.019.07a एवा त इन्द्रोचथमहेम श्रवस्या न त्मना वाजयन्तः ।

2.019.07c अश्याम तत्साप्तमाशुषाणा ननमो वधरदेवस्य पीयोः ॥

2.019.07a evā ta indrocatham ahema śravasyā na tmanā vājayantaḥ |
2.019.07c aśyāma tat sāptam āśuṣāṇā nanamo vadhar adevasya pīyoḥ ||

2.019.08a एवा ते गृत्समदाः शूर मन्मावस्यवो न वयुनानि तक्षुः ।

2.019.08c ब्रह्मण्यन्त इन्द्र ते नवीय इषमूर्जं सुक्षितिं सुम्नमश्युः ॥

2.019.08a evā te gṛtsamadāḥ śūra manmāvasyavo na vayunāni takṣuḥ |
2.019.08c brahmaṇyanta indra te navīya iṣam ūrjaṁ sukṣitiṁ sumnam aśyuḥ ||

2.019.09a नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।

2.019.09c शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥

2.019.09a nūnaṁ sā te prati varaṁ jaritre duhīyad indra dakṣiṇā maghonī |
2.019.09c śikṣā stotṛbhyo māti dhag bhago no bṛhad vadema vidathe suvīrāḥ ||

2.020.01a वयं ते वय इन्द्र विद्धि षु णः प्र भरामहे वाजयुर्न रथम् ।

2.020.01c विपन्यवो दीध्यतो मनीषा सुम्नमियक्षन्तस्त्वावतो नॄन् ॥

2.020.01a vayaṁ te vaya indra viddhi ṣu ṇaḥ pra bharāmahe vājayur na ratham |
2.020.01c vipanyavo dīdhyato manīṣā sumnam iyakṣantas tvāvato nṝn ||

2.020.02a त्वं न इन्द्र त्वाभिरूती त्वायतो अभिष्टिपासि जनान् ।

2.020.02c त्वमिनो दाशुषो वरूतेत्थाधीरभि यो नक्षति त्वा ॥

2.020.02a tvaṁ na indra tvābhir ūtī tvāyato abhiṣṭipāsi janān |
2.020.02c tvam ino dāśuṣo varūtetthādhīr abhi yo nakṣati tvā ||

2.020.03a स नो युवेन्द्रो जोहूत्रः सखा शिवो नरामस्तु पाता ।

2.020.03c यः शंसन्तं यः शशमानमूती पचन्तं च स्तुवन्तं च प्रणेषत् ॥

2.020.03a sa no yuvendro johūtraḥ sakhā śivo narām astu pātā |
2.020.03c yaḥ śaṁsantaṁ yaḥ śaśamānam ūtī pacantaṁ ca stuvantaṁ ca praṇeṣat ||

2.020.04a तमु स्तुष इन्द्रं तं गृणीषे यस्मिन्पुरा वावृधुः शाशदुश्च ।

2.020.04c स वस्वः कामं पीपरदियानो ब्रह्मण्यतो नूतनस्यायोः ॥

2.020.04a tam u stuṣa indraṁ taṁ gṛṇīṣe yasmin purā vāvṛdhuḥ śāśaduś ca |
2.020.04c sa vasvaḥ kāmam pīparad iyāno brahmaṇyato nūtanasyāyoḥ ||

2.020.05a सो अङ्गिरसामुचथा जुजुष्वान्ब्रह्मा तूतोदिन्द्रो गातुमिष्णन् ।

2.020.05c मुष्णन्नुषसः सूर्येण स्तवानश्नस्य चिच्छिश्नथत्पूर्व्याणि ॥

2.020.05a so aṅgirasām ucathā jujuṣvān brahmā tūtod indro gātum iṣṇan |
2.020.05c muṣṇann uṣasaḥ sūryeṇa stavān aśnasya cic chiśnathat pūrvyāṇi ||

2.020.06a स ह श्रुत इन्द्रो नाम देव ऊर्ध्वो भुवन्मनुषे दस्मतमः ।

2.020.06c अव प्रियमर्शसानस्य साह्वाञ्छिरो भरद्दासस्य स्वधावान् ॥

2.020.06a sa ha śruta indro nāma deva ūrdhvo bhuvan manuṣe dasmatamaḥ |
2.020.06c ava priyam arśasānasya sāhvāñ chiro bharad dāsasya svadhāvān ||

2.020.07a स वृत्रहेन्द्रः कृष्णयोनीः पुरंदरो दासीरैरयद्वि ।

2.020.07c अजनयन्मनवे क्षामपश्च सत्रा शंसं यजमानस्य तूतोत् ॥

2.020.07a sa vṛtrahendraḥ kṛṣṇayonīḥ purandaro dāsīr airayad vi |
2.020.07c ajanayan manave kṣām apaś ca satrā śaṁsaṁ yajamānasya tūtot ||

2.020.08a तस्मै तवस्य१मनु दायि सत्रेन्द्राय देवेभिरर्णसातौ ।

2.020.08c प्रति यदस्य वज्रं बाह्वोर्धुर्हत्वी दस्यून्पुर आयसीर्नि तारीत् ॥

2.020.08a tasmai tavasya1m anu dāyi satrendrāya devebhir arṇasātau |
2.020.08c prati yad asya vajram bāhvor dhur hatvī dasyūn pura āyasīr ni tārīt ||

2.020.09a नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।

2.020.09c शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥

2.020.09a nūnaṁ sā te prati varaṁ jaritre duhīyad indra dakṣiṇā maghonī |
2.020.09c śikṣā stotṛbhyo māti dhag bhago no bṛhad vadema vidathe suvīrāḥ ||

2.021.01a विश्वजिते धनजिते स्वर्जिते सत्राजिते नृजित उर्वराजिते ।

2.021.01c अश्वजिते गोजिते अब्जिते भरेन्द्राय सोमं यजताय हर्यतम् ॥

2.021.01a viśvajite dhanajite svarjite satrājite nṛjita urvarājite |
2.021.01c aśvajite gojite abjite bharendrāya somaṁ yajatāya haryatam ||

2.021.02a अभिभुवेऽभिभङ्गाय वन्वतेऽषाळ्हाय सहमानाय वेधसे ।

2.021.02c तुविग्रये वह्नये दुष्टरीतवे सत्रासाहे नम इन्द्राय वोचत ॥

2.021.02a abhibhuve 'bhibhaṅgāya vanvate 'ṣāḷhāya sahamānāya vedhase |
2.021.02c tuvigraye vahnaye duṣṭarītave satrāsāhe nama indrāya vocata ||

2.021.03a सत्रासाहो जनभक्षो जनंसहश्च्यवनो युध्मो अनु जोषमुक्षितः ।

2.021.03c वृतंचयः सहुरिर्विक्ष्वारित इन्द्रस्य वोचं प्र कृतानि वीर्या ॥

2.021.03a satrāsāho janabhakṣo janaṁsahaś cyavano yudhmo anu joṣam ukṣitaḥ |
2.021.03c vṛtañcayaḥ sahurir vikṣv ārita indrasya vocam pra kṛtāni vīryā ||

2.021.04a अनानुदो वृषभो दोधतो वधो गम्भीर ऋष्वो असमष्टकाव्यः ।

2.021.04c रध्रचोदः श्नथनो वीळितस्पृथुरिन्द्रः सुयज्ञ उषसः स्वर्जनत् ॥

2.021.04a anānudo vṛṣabho dodhato vadho gambhīra ṛṣvo asamaṣṭakāvyaḥ |
2.021.04c radhracodaḥ śnathano vīḷitas pṛthur indraḥ suyajña uṣasaḥ svar janat ||

2.021.05a यज्ञेन गातुमप्तुरो विविद्रिरे धियो हिन्वाना उशिजो मनीषिणः ।

2.021.05c अभिस्वरा निषदा गा अवस्यव इन्द्रे हिन्वाना द्रविणान्याशत ॥

2.021.05a yajñena gātum apturo vividrire dhiyo hinvānā uśijo manīṣiṇaḥ |
2.021.05c abhisvarā niṣadā gā avasyava indre hinvānā draviṇāny āśata ||

2.021.06a इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे ।

2.021.06c पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नाम् ॥

2.021.06a indra śreṣṭhāni draviṇāni dhehi cittiṁ dakṣasya subhagatvam asme |
2.021.06c poṣaṁ rayīṇām ariṣṭiṁ tanūnāṁ svādmānaṁ vācaḥ sudinatvam ahnām ||

2.022.01a त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृपत्सोममपिबद्विष्णुना सुतं यथावशत् ।

2.022.01e स ईं ममाद महि कर्म कर्तवे महामुरुं सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्य इन्दुः ॥

2.022.01a trikadrukeṣu mahiṣo yavāśiraṁ tuviśuṣmas tṛpat somam apibad viṣṇunā sutaṁ yathāvaśat |
2.022.01e sa īm mamāda mahi karma kartave mahām uruṁ sainaṁ saścad devo devaṁ satyam indraṁ satya induḥ ||

2.022.02a अध त्विषीमाँ अभ्योजसा क्रिविं युधाभवदा रोदसी अपृणदस्य मज्मना प्र वावृधे ।

2.022.02e अधत्तान्यं जठरे प्रेमरिच्यत सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्य इन्दुः ॥

2.022.02a adha tviṣīmām̐ abhy ojasā kriviṁ yudhābhavad ā rodasī apṛṇad asya majmanā pra vāvṛdhe |
2.022.02e adhattānyaṁ jaṭhare prem aricyata sainaṁ saścad devo devaṁ satyam indraṁ satya induḥ ||

2.022.03a साकं जातः क्रतुना साकमोजसा ववक्षिथ साकं वृद्धो वीर्यैः सासहिर्मृधो विचर्षणिः ।

2.022.03e दाता राध स्तुवते काम्यं वसु सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्य इन्दुः ॥

2.022.03a sākaṁ jātaḥ kratunā sākam ojasā vavakṣitha sākaṁ vṛddho vīryaiḥ sāsahir mṛdho vicarṣaṇiḥ |
2.022.03e dātā rādha stuvate kāmyaṁ vasu sainaṁ saścad devo devaṁ satyam indraṁ satya induḥ ||

2.022.04a तव त्यन्नर्यं नृतोऽप इन्द्र प्रथमं पूर्व्यं दिवि प्रवाच्यं कृतम् ।

2.022.04c यद्देवस्य शवसा प्रारिणा असुं रिणन्नपः ।

2.022.04e भुवद्विश्वमभ्यादेवमोजसा विदादूर्जं शतक्रतुर्विदादिषम् ॥

2.022.04a tava tyan naryaṁ nṛto 'pa indra prathamam pūrvyaṁ divi pravācyaṁ kṛtam |
2.022.04c yad devasya śavasā prāriṇā asuṁ riṇann apaḥ |
2.022.04e bhuvad viśvam abhy ādevam ojasā vidād ūrjaṁ śatakratur vidād iṣam ||

2.023.01a गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् ।

2.023.01c ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम् ॥

2.023.01a gaṇānāṁ tvā gaṇapatiṁ havāmahe kaviṁ kavīnām upamaśravastamam |
2.023.01c jyeṣṭharājam brahmaṇām brahmaṇas pata ā naḥ śṛṇvann ūtibhiḥ sīda sādanam ||

2.023.02a देवाश्चित्ते असुर्य प्रचेतसो बृहस्पते यज्ञियं भागमानशुः ।

2.023.02c उस्रा इव सूर्यो ज्योतिषा महो विश्वेषामिज्जनिता ब्रह्मणामसि ॥

2.023.02a devāś cit te asurya pracetaso bṛhaspate yajñiyam bhāgam ānaśuḥ |
2.023.02c usrā iva sūryo jyotiṣā maho viśveṣām ij janitā brahmaṇām asi ||

2.023.03a आ विबाध्या परिरापस्तमांसि च ज्योतिष्मन्तं रथमृतस्य तिष्ठसि ।

2.023.03c बृहस्पते भीममममित्रदम्भनं रक्षोहणं गोत्रभिदं स्वर्विदम् ॥

2.023.03a ā vibādhyā parirāpas tamāṁsi ca jyotiṣmantaṁ ratham ṛtasya tiṣṭhasi |
2.023.03c bṛhaspate bhīmam amitradambhanaṁ rakṣohaṇaṁ gotrabhidaṁ svarvidam ||

2.023.04a सुनीतिभिर्नयसि त्रायसे जनं यस्तुभ्यं दाशान्न तमंहो अश्नवत् ।

2.023.04c ब्रह्मद्विषस्तपनो मन्युमीरसि बृहस्पते महि तत्ते महित्वनम् ॥

2.023.04a sunītibhir nayasi trāyase janaṁ yas tubhyaṁ dāśān na tam aṁho aśnavat |
2.023.04c brahmadviṣas tapano manyumīr asi bṛhaspate mahi tat te mahitvanam ||

2.023.05a न तमंहो न दुरितं कुतश्चन नारातयस्तितिरुर्न द्वयाविनः ।

2.023.05c विश्वा इदस्माद्ध्वरसो वि बाधसे यं सुगोपा रक्षसि ब्रह्मणस्पते ॥

2.023.05a na tam aṁho na duritaṁ kutaś cana nārātayas titirur na dvayāvinaḥ |

2.023.05c viśvā id asmād dhvaraso vi bādhase yaṁ sugopā rakṣasi brahmaṇas pate ||

2.023.06a त्वं नो गोपाः पथिकृद्विचक्षणस्तव व्रताय मतिभिर्जरामहे ।

2.023.06c बृहस्पते यो नो अभि ह्वरो दधे स्वा तं मर्मर्तु दुच्छुना हरस्वती ॥

2.023.06a tvaṁ no gopāḥ pathikṛd vicakṣaṇas tava vratāya matibhir jarāmahe |
2.023.06c bṛhaspate yo no abhi hvaro dadhe svā tam marmartu ducchunā harasvatī ||

2.023.07a उत वा यो नो मर्चयादनागसोऽरातीवा मर्तः सानुको वृकः ।

2.023.07c बृहस्पते अप तं वर्तया पथः सुगं नो अस्यै देववीतये कृधि ॥

2.023.07a uta vā yo no marcayād anāgaso 'rātīvā martaḥ sānuko vṛkaḥ |
2.023.07c bṛhaspate apa taṁ vartayā pathaḥ sugaṁ no asyai devavītaye kṛdhi ||

2.023.08a त्रातारं त्वा तनूनां हवामहेऽवस्पर्तरधिवक्तारमस्मयुम् ।

2.023.08c बृहस्पते देवनिदो नि बर्हय मा दुरेवा उत्तरं सुम्नमुन्नशन् ॥

2.023.08a trātāraṁ tvā tanūnāṁ havāmahe 'vaspartar adhivaktāram asmayum |
2.023.08c bṛhaspate devanido ni barhaya mā durevā uttaraṁ sumnam un naśan ||

2.023.09a त्वया वयं सुवृधा ब्रह्मणस्पते स्पार्हा वसु मनुष्या ददीमहि ।

2.023.09c या नो दूरे तळितो या अरातयोऽभि सन्ति जम्भया ता अनप्नसः ॥

2.023.09a tvayā vayaṁ suvṛdhā brahmaṇas pate spārhā vasu manuṣyā dadīmahi |
2.023.09c yā no dūre taḷito yā arātayo 'bhi santi jambhayā tā anapnasaḥ ||

2.023.10a त्वया वयमुत्तमं धीमहे वयो बृहस्पते पप्रिणा सस्निना युजा ।

2.023.10c मा नो दुःशंसो अभिदिप्सुरीशत प्र सुशंसा मतिभिस्तारिषीमहि ॥

2.023.10a tvayā vayam uttamaṁ dhīmahe vayo bṛhaspate papriṇā sasninā yujā |
2.023.10c mā no duḥśaṁso abhidipsur īśata pra suśaṁsā matibhis tāriṣīmahi ||

2.023.11a अनानुदो वृषभो जग्मिराहवं निष्टप्ता शत्रुं पृतनासु सासहिः ।

2.023.11c असि सत्य ऋणया ब्रह्मणस्पत उग्रस्य चिद्दमिता वीळुहर्षिणः ॥

2.023.11a anānudo vṛṣabho jagmir āhavaṁ niṣṭaptā śatruṁ pṛtanāsu sāsahiḥ |
2.023.11c asi satya ṛṇayā brahmaṇas pata ugrasya cid damitā vīḷuharṣiṇaḥ ||

2.023.12a अदेवेन मनसा यो रिषण्यति शासामुग्रो मन्यमानो जिघांसति ।

2.023.12c बृहस्पते मा प्रणक्तस्य नो वधो नि कर्म मन्युं दुरेवस्य शर्धतः ॥

2.023.12a adevena manasā yo riṣaṇyati śāsām ugro manyamāno jighāṁsati |
2.023.12c bṛhaspate mā praṇak tasya no vadho ni karma manyuṁ durevasya śardhataḥ ||

2.023.13a भरेषु हव्यो नमसोपसद्यो गन्ता वाजेषु सनिता धनंधनम् ।

2.023.13c विश्वा इदर्यो अभिदिप्स्वो३ मृधो बृहस्पतिर्वि ववर्हा रथाँ इव ॥

2.023.13a bhareṣu havyo namasopasadyo gantā vājeṣu sanitā dhanaṁ-dhanam |
2.023.13c viśvā id aryo abhidipsvo3 mṛdho bṛhaspatir vi vavarhā rathāṁ̐ iva ||

2.023.14a तेजिष्ठया तपनी रक्षसस्तप ये त्वा निदे दधिरे दृष्टवीर्यम् ।

2.023.14c आविस्तत्कृष्व यदसत्त उक्थ्यं१ बृहस्पते वि परिरापो अर्दय ॥

2.023.14a tejiṣṭhayā tapanī rakṣasas tapa ye tvā nide dadhire dṛṣṭavīryam |
2.023.14c āvis tat kṛṣva yad asat ta ukthya1m bṛhaspate vi parirāpo ardaya ||

2.023.15a बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु ।

2.023.15c यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥

2.023.15a bṛhaspate ati yad aryo arhād dyumad vibhāti kratumaj janeṣu |
2.023.15c yad dīdayac chavasa ṛtaprajāta tad asmāsu draviṇaṁ dhehi citram ||

2.023.16a मा न स्तेनेभ्यो ये अभि द्रुहस्पदे निरामिणो रिपवोऽन्नेषु जागृधुः ।

2.023.16c आ देवानामोहते वि व्रयो हृदि बृहस्पते न परः साम्नो विदुः ॥

2.023.16a mā na stenebhyo ye abhi druhas pade nirāmiṇo ripavo 'nneṣu jāgṛdhuḥ |
2.023.16c ā devānām ohate vi vrayo hṛdi bṛhaspate na paraḥ sāmno viduḥ ||

2.023.17a विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।

2.023.17c स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरि ॥

2.023.17a viśvebhyo hi tvā bhuvanebhyas pari tvaṣṭājanat sāmnaḥ-sāmnaḥ kaviḥ |
2.023.17c sa ṛṇacid ṛṇayā brahmaṇas patir druho hantā maha ṛtasya dhartari ||

2.023.18a तव श्रिये व्यजिहीत पर्वतो गवां गोत्रमुदसृजो यदङ्गिरः ।

2.023.18c इन्द्रेण युजा तमसा परीवृतं बृहस्पते निरपामौब्जो अर्णवम् ॥

2.023.18a tava śriye vy ajihīta parvato gavāṁ gotram udasṛjo yad aṅgiraḥ |

2.023.18c indreṇa yujā tamasā parīvṛtam bṛhaspate nir apām aubjo arṇavam ||

2.023.19a ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व ।

2.023.19c विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥

2.023.19a brahmaṇas pate tvam asya yantā sūktasya bodhi tanayaṁ ca jinva |
2.023.19c viśvaṁ tad bhadraṁ yad avanti devā bṛhad vadema vidathe suvīrāḥ ||

2.024.01a सेमामविड्ढि प्रभृतिं य ईशिषेऽया विधेम नवया महा गिरा ।

2.024.01c यथा नो मीढ्वान्स्तवते सखा तव बृहस्पते सीषधः सोत नो मतिम् ॥

2.024.01a semām aviḍḍhi prabhṛtiṁ ya īśiṣe 'yā vidhema navayā mahā girā |
2.024.01c yathā no mīḍhvān stavate sakhā tava bṛhaspate sīṣadhaḥ sota no matim ||

2.024.02a यो नन्त्वान्यनमन्न्योजसोतादर्दर्मन्युना शम्बराणि वि ।

2.024.02c प्राच्यावयदच्युता ब्रह्मणस्पतिरा चाविशद्वसुमन्तं वि पर्वतम् ॥

2.024.02a yo nantvāny anaman ny ojasotādardar manyunā śambarāṇi vi |
2.024.02c prācyāvayad acyutā brahmaṇas patir ā cāviśad vasumantaṁ vi parvatam ||

2.024.03a तद्देवानां देवतमाय कर्त्वमश्रथ्नन्दृळ्हाव्रदन्त वीळिता ।

2.024.03c उद्गा आजदभिनद्ब्रह्मणा वलमगूहत्तमो व्यचक्षयत्स्वः ॥

2.024.03a tad devānāṁ devatamāya kartvam aśrathnan dṛḷhāvradanta vīḷitā |
2.024.03c ud gā ājad abhinad brahmaṇā valam agūhat tamo vy acakṣayat svaḥ ||

2.024.04a अश्मास्यमवतं ब्रह्मणस्पतिर्मधुधारमभि यमोजसातृणत् ।

2.024.04c तमेव विश्वे पपिरे स्वर्दृशो बहु साकं सिसिचुरुत्समुद्रिणम् ॥

2.024.04a aśmāsyam avatam brahmaṇas patir madhudhāram abhi yam ojasātṛṇat |
2.024.04c tam eva viśve papire svardṛśo bahu sākaṁ sisicur utsam udriṇam ||

2.024.05a सना ता का चिद्भुवना भवीत्वा माद्भिः शरद्भिर्दुरो वरन्त वः ।

2.024.05c अयतन्ता चरतो अन्यदन्यदिद्या चकार वयुना ब्रह्मणस्पतिः ॥

2.024.05a sanā tā kā cid bhuvanā bhavītvā mādbhiḥ śaradbhir duro varanta vaḥ |
2.024.05c ayatantā carato anyad-anyad id yā cakāra vayunā brahmaṇas patiḥ ||

2.024.06a अभिनक्षन्तो अभि ये तमानशुर्निधिं पणीनां परमं गुहा हितम् ।

2.024.06c ते विद्वांसः प्रतिचक्ष्यानृता पुनर्यत उ आयन्तदुदीयुराविशम् ॥

2.024.06a abhinakṣanto abhi ye tam ānaśur nidhim paṇīnām paramaṁ guhā hitam |
2.024.06c te vidvāṁsaḥ praticakṣyānṛtā punar yata u āyan tad ud īyur āviśam ||

2.024.07a ऋतावानः प्रतिचक्ष्यानृता पुनरात आ तस्थुः कवयो महस्पथः ।

2.024.07c ते बाहुभ्यां धमितमग्निमश्मनि नकिः षो अस्त्यरणो जहुर्हि तम् ॥

2.024.07a ṛtāvānaḥ praticakṣyānṛtā punar āta ā tasthuḥ kavayo mahas pathaḥ |
2.024.07c te bāhubhyāṁ dhamitam agnim aśmani nakiḥ ṣo asty araṇo jahur hi tam ||

2.024.08a ऋतज्येन क्षिप्रेण ब्रह्मणस्पतिर्यत्र वष्टि प्र तदश्नोति धन्वना ।

2.024.08c तस्य साध्वीरिषवो याभिरस्यति नृचक्षसो दृशये कर्णयोनयः ॥

2.024.08a ṛtajyena kṣipreṇa brahmaṇas patir yatra vaṣṭi pra tad aśnoti dhanvanā |
2.024.08c tasya sādhvīr iṣavo yābhir asyati nṛcakṣaso dṛśaye karṇayonayaḥ ||

2.024.09a स संनयः स विनयः पुरोहितः स सुष्टुतः स युधि ब्रह्मणस्पतिः ।

2.024.09c चाक्ष्मो यद्वाजं भरते मती धनादित्सूर्यस्तपति तप्यतुर्वृथा ॥

2.024.09a sa sannayaḥ sa vinayaḥ purohitaḥ sa suṣṭutaḥ sa yudhi brahmaṇas patiḥ |
2.024.09c cākṣmo yad vājam bharate matī dhanād it sūryas tapati tapyatur vṛthā ||

2.024.10a विभु प्रभु प्रथमं मेहनावतो बृहस्पतेः सुविदत्राणि राध्या ।

2.024.10c इमा सातानि वेन्यस्य वाजिनो येन जना उभये भुञ्जते विशः ॥

2.024.10a vibhu prabhu prathamam mehanāvato bṛhaspateḥ suvidatrāṇi rādhyā |
2.024.10c imā sātāni venyasya vājino yena janā ubhaye bhuñjate viśaḥ ||

2.024.11a योऽवरे वृजने विश्वथा विभुर्महामु रण्वः शवसा ववक्षिथ ।

2.024.11c स देवो देवान्प्रति पप्रथे पृथु विश्वेदु ता परिभूर्ब्रह्मणस्पतिः ॥

2.024.11a yo 'vare vṛjane viśvathā vibhur mahām u raṇvaḥ śavasā vavakṣitha |
2.024.11c sa devo devān prati paprathe pṛthu viśved u tā paribhūr brahmaṇas patiḥ ||

2.024.12a विश्वं सत्यं मघवाना युवोरिदापश्चन प्र मिनन्ति व्रतं वाम् ।

2.024.12c अच्छेन्द्राब्रह्मणस्पती हविर्नोऽन्नं युजेव वाजिना जिगातम् ॥

2.024.12a viśva̍ṁ sa̱tyam ma̍ghavānā yu̱vor id āpa̍ś ca̱na pra mi̍nanti vra̱taṁ vā̍m |
2.024.12c acche̍ndrābrahmaṇaspatī ha̱vir no 'nna̱ṁ yuje̍va vā̱jinā̍ jigātam ||

2.024.13a उताशिष्ठा अनु शृण्वन्ति वह्नयः सभेयो विप्रो भरते मती धना ।

2.024.13c वीळुद्वेषा अनु वश ऋणमाददिः स ह वाजी समिथे ब्रह्मणस्पतिः ॥

2.024.13a u̱tāśi̍ṣṭhā̱ anu̍ śṛṇvanti̱ vahna̍yaḥ sa̱bheyo̱ vipro̍ bharate ma̱tī dhanā̍ |
2.024.13c vī̱ḻu̱dveṣā̱ anu̱ vaśa̍ ṛ̱ṇam ā̍da̱diḥ sa ha̍ vā̱jī sami̍the brahmaṇa̱s pati̍ḥ ||

2.024.14a ब्रह्मणस्पतेरभवद्यथावशं सत्यो मन्युर्महि कर्मा करिष्यतः ।

2.024.14c यो गा उदाजत्स दिवे वि चाभजन्महीव रीतिः शवसासरत्पृथक् ॥

2.024.14a brahma̍ṇas pate̍r abhavad yathāva̱śaṁ sa̱tyo ma̱nyur mahi̱ karmā̍ kariṣya̱taḥ |
2.024.14c yo gā u̱dāja̱t sa di̱ve vi cā̍bhajan ma̱hīva̍ rī̱tiḥ śava̍sāsara̱t pṛthak ||

2.024.15a ब्रह्मणस्पते सुयमस्य विश्वहा रायः स्याम रथ्यो३ वयस्वतः ।

2.024.15c वीरेषु वीराँ उप पृङ्धि नस्त्वं यदीशानो ब्रह्मणा वेषि मे हवम् ॥

2.024.15a brahma̍ṇas pate su̱yama̍sya vi̱śvahā̍ rā̱yaḥ syā̍ma ra̱thyo̱3 vaya̍svataḥ |
2.024.15c vī̱reṣu̍ vī̱rām̐ upa̍ pṛṅdhi na̱s tvaṁ yad īśā̍no̱ brahma̍ṇā̱ veṣi̍ me̱ hava̍m ||

2.024.16a ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व ।

2.024.16c विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥

2.024.16a brahma̍ṇas pate̱ tvam a̱sya ya̱ntā sū̱ktasya̍ bodhi̱ tana̍yaṁ ca jinva |
2.024.16c viśva̱ṁ tad bha̱draṁ yad ava̍nti de̱vā bṛ̱had va̍dema vi̱dathe̍ su̱vīrā̍ḥ ||

2.025.01a इन्धानो अग्निं वनवद्वनुष्यतः कृतब्रह्मा शूशुवद्रातहव्य इत् ।

2.025.01c जातेन जातमति स प्र सर्सृते यंयं युजं कृणुते ब्रह्मणस्पतिः ॥

2.025.01a indhā̍no a̱gniṁ va̍navad vanuṣya̱taḥ kṛ̱tabra̍hmā śūśuvad rā̱taha̍vya̱ it |
2.025.01c jā̱tena̍ jā̱tam ati̱ sa pra sa̍rsṛte̱ yaṁ-ya̱ṁ yuja̍ṁ kṛṇu̱te brahma̍ṇa̱s pati̍ḥ ||

2.025.02a वीरेभिर्वीरान्वनवद्वनुष्यतो गोभी रयिं पप्रथद्बोधति त्मना ।

2.025.02c तोकं च तस्य तनयं च वर्धते यंयं युजं कृणुते ब्रह्मणस्पतिः ॥

2.025.02a vīrebhir vīrān vanavad vanuṣyato gobhī rayim paprathad bodhati tmanā |
2.025.02c tokaṁ ca tasya tanayaṁ ca vardhate yaṁ-yaṁ yujaṁ kṛṇute brahmaṇas patiḥ ||

2.025.03a सिन्धुर्न क्षोदः शिमीवाँ ऋघायतो वृषेव वध्रीँरभि वष्ट्योजसा ।

2.025.03c अग्नेरिव प्रसितिर्नाह वर्तवे यंयं युजं कृणुते ब्रह्मणस्पतिः ॥

2.025.03a sindhur na kṣodaḥ śimīvām̐ ṛghāyato vṛṣeva vadhrīm̐r abhi vaṣṭy ojasā |
2.025.03c agner iva prasitir nāha vartave yaṁ-yaṁ yujaṁ kṛṇute brahmaṇas patiḥ ||

2.025.04a तस्मा अर्षन्ति दिव्या असश्चतः स सत्वभिः प्रथमो गोषु गच्छति ।

2.025.04c अनिभृष्टतविषिर्हन्त्योजसा यंयं युजं कृणुते ब्रह्मणस्पतिः ॥

2.025.04a tasmā arṣanti divyā asaścataḥ sa satvabhiḥ prathamo goṣu gacchati |
2.025.04c anibhṛṣṭataviṣir hanty ojasā yaṁ-yaṁ yujaṁ kṛṇute brahmaṇas patiḥ ||

2.025.05a तस्मा इद्विश्वे धुनयन्त सिन्धवोऽच्छिद्रा शर्म दधिरे पुरूणि ।

2.025.05c देवानां सुम्ने सुभगः स एधते यंयं युजं कृणुते ब्रह्मणस्पतिः ॥

2.025.05a tasmā id viśve dhunayanta sindhavo 'cchidrā śarma dadhire purūṇi |
2.025.05c devānāṁ sumne subhagaḥ sa edhate yaṁ-yaṁ yujaṁ kṛṇute brahmaṇas patiḥ ||

2.026.01a ऋजुरिच्छंसो वनवद्वनुष्यतो देवयन्निददेवयन्तमभ्यसत् ।

2.026.01c सुप्रावीरिद्वनवत्पृत्सु दुष्टरं यज्वेदयज्योर्वि भजाति भोजनम् ॥

2.026.01a ṛjur ic chaṁso vanavad vanuṣyato devayann id adevayantam abhy asat |
2.026.01c suprāvīr id vanavat pṛtsu duṣṭaraṁ yajved ayajyor vi bhajāti bhojanam ||

2.026.02a यजस्व वीर प्र विहि मनायतो भद्रं मनः कृणुष्व वृत्रतूर्ये ।

2.026.02c हविष्कृणुष्व सुभगो यथाससि ब्रह्मणस्पतेरव आ वृणीमहे ॥

2.026.02a yajasva vīra pra vihi manāyato bhadram manaḥ kṛṇuṣva vṛtratūrye |
2.026.02c haviṣ kṛṇuṣva subhago yathāsasi brahmaṇas pater ava ā vṛṇīmahe ||

2.026.03a स इज्जनेन स विशा स जन्मना स पुत्रैर्वाजं भरते धना नृभिः ।

2.026.03c देवानां यः पितरमाविवासति श्रद्धामना हविषा ब्रह्मणस्पतिम् ॥

2.026.03a sa ij janena sa viśā sa janmanā sa putrair vājam bharate dhanā nṛbhiḥ |
2.026.03c devānāṁ yaḥ pitaram āvivāsati śraddhāmanā haviṣā brahmaṇas patim ||

2.026.04a यो अस्मै हव्यैर्घृतवद्भिरविधत्प्र तं प्राचा नयति ब्रह्मणस्पतिः ।

2.026.04c उरुष्यतीमंहसो रक्षती रिषो३ऽंहोश्चिदस्मा उरुचक्रिरद्भुतः ॥

2.026.04a yo asmai havyair ghṛtavadbhir avidhat pra tam prācā nayati brahmaṇas patiḥ |
2.026.04c uruṣyatīm aṁhaso rakṣatī riṣo3 'ṁhoś cid asmā urucakrir adbhutaḥ ||

2.027.01a इमा गिर आदित्येभ्यो घृतस्नूः सनाद्राजभ्यो जुह्वा जुहोमि ।

2.027.01c शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः ॥

2.027.01a imā gira ādityebhyo ghṛtasnūḥ sanād rājabhyo juhvā juhomi |
2.027.01c śṛṇotu mitro aryamā bhago nas tuvijāto varuṇo dakṣo aṁśaḥ ||

2.027.02a इमं स्तोमं सक्रतवो मे अद्य मित्रो अर्यमा वरुणो जुषन्त ।

2.027.02c आदित्यासः शुचयो धारपूता अवृजिना अनवद्या अरिष्टाः ॥

2.027.02a imaṁ stomaṁ sakratavo me adya mitro aryamā varuṇo juṣanta |
2.027.02c ādityāsaḥ śucayo dhārapūtā avṛjinā anavadyā ariṣṭāḥ ||

2.027.03a त आदित्यास उरवो गभीरा अदब्धासो दिप्सन्तो भूर्यक्षाः ।

2.027.03c अन्तः पश्यन्ति वृजिनोत साधु सर्वं राजभ्यः परमा चिदन्ति ॥

2.027.03a ta ādityāsa uravo gabhīrā adabdhāso dipsanto bhūryakṣāḥ |
2.027.03c antaḥ paśyanti vṛjinota sādhu sarvaṁ rājabhyaḥ paramā cid anti ||

2.027.04a धारयन्त आदित्यासो जगत्स्था देवा विश्वस्य भुवनस्य गोपाः ।

2.027.04c दीर्घाधियो रक्षमाणा असुर्यमृतावानश्चयमाना ऋणानि ॥

2.027.04a dhārayanta ādityāso jagat sthā devā viśvasya bhuvanasya gopāḥ |
2.027.04c dīrghādhiyo rakṣamāṇā asuryam ṛtāvānaś cayamānā ṛṇāni ||

2.027.05a विद्यामादित्या अवसो वो अस्य यदर्यमन्भय आ चिन्मयोभु ।

2.027.05c युष्माकं मित्रावरुणा प्रणीतौ परि श्वभ्रेव दुरितानि वृज्याम् ॥

2.027.05a vidyām ādityā avaso vo asya yad aryaman bhaya ā cin mayobhu |
2.027.05c yuṣmākam mitrāvaruṇā praṇītau pari śvabhreva duritāni vṛjyām ||

2.027.06a सुगो हि वो अर्यमन्मित्र पन्था अनृक्षरो वरुण साधुरस्ति ।

2.027.06c तेनादित्या अधि वोचता नो यच्छता नो दुष्परिहन्तु शर्म ॥

2.027.06a sugo hi vo aryaman mitra panthā anṛkṣaro varuṇa sādhur asti |

2.027.06c tenādityā adhi vocatā no yacchatā no duṣparihantu śarma ||

2.027.07a पिपर्तु नो अदिती राजपुत्राति द्वेषांस्यर्यमा सुगेभिः ।

2.027.07c बृहन्मित्रस्य वरुणस्य शर्मोप स्याम पुरुवीरा अरिष्टाः ॥

2.027.07a pipartu no aditī rājaputrāti dveṣāṁsy aryamā sugebhiḥ |

2.027.07c bṛhan mitrasya varuṇasya śarmopa syāma puruvīrā ariṣṭāḥ ||

2.027.08a तिस्रो भूमीर्धारयन्त्रीँरुत द्यून्त्रीणि व्रता विदथे अन्तरेषाम् ।

2.027.08c ऋतेनादित्या महि वो महित्वं तदर्यमन्वरुण मित्र चारु ॥

2.027.08a tisro bhūmīr dhārayan trīm̐r uta dyūn trīṇi vratā vidathe antar eṣām |

2.027.08c ṛtenādityā mahi vo mahitvaṁ tad aryaman varuṇa mitra cāru ||

2.027.09a त्री रोचना दिव्या धारयन्त हिरण्ययाः शुचयो धारपूताः ।

2.027.09c अस्वप्नजो अनिमिषा अदब्धा उरुशंसा ऋजवे मर्त्याय ॥

2.027.09a trī rocanā divyā dhārayanta hiraṇyayāḥ śucayo dhārapūtāḥ |

2.027.09c asvapnajo animiṣā adabdhā uruśaṁsā ṛjave martyāya ||

2.027.10a त्वं विश्वेषां वरुणासि राजा ये च देवा असुर ये च मर्ताः ।

2.027.10c शतं नो रास्व शरदो विचक्षेऽश्यामायूंषि सुधितानि पूर्वा ॥

2.027.10a tvaṁ viśveṣāṁ varuṇāsi rājā ye ca devā asura ye ca martāḥ |

2.027.10c śataṁ no rāsva śarado vicakṣe 'śyāmāyūṁṣi sudhitāni pūrvā ||

2.027.11a न दक्षिणा वि चिकिते न सव्या न प्राचीनमादित्या नोत पश्चा ।

2.027.11c पाक्या चिद्वसवो धीर्या चिद्युष्मानीतो अभयं ज्योतिरश्याम् ॥

2.027.11a na dakṣiṇā vi cikite na savyā na prācīnam ādityā nota paścā |

2.027.11c pākyā cid vasavo dhīryā cid yuṣmānīto abhayaṁ jyotir aśyām ||

2.027.12a यो राजभ्य ऋतनिभ्यो ददाश यं वर्धयन्ति पुष्टयश्च नित्याः ।

2.027.12c स रेवान्याति प्रथमो रथेन वसुदावा विदथेषु प्रशस्तः ॥

2.027.12a yo rājabhya ṛtanibhyo dadāśa yaṁ vardhayanti puṣṭayaś ca nityāḥ |

2.027.12c sa revān yāti prathamo rathena vasudāvā vidatheṣu praśastaḥ ||

2.027.13a शुचिरपः सूयवसा अदब्ध उप क्षेति वृद्धवयाः सुवीरः ।

2.027.13c नकिष्टं घ्नन्त्यन्तितो न दूराद्य आदित्यानां भवति प्रणीतौ ॥

2.027.13a śucir apaḥ sūyavasā adabdha upa kṣeti vṛddhavayāḥ suvīraḥ |
2.027.13c nakiṣ ṭaṁ ghnanty antito na dūrād ya ādityānām bhavati praṇītau ||

2.027.14a अदिते मित्र वरुणोत मृळ यद्वो वयं चकृमा कच्चिदागः ।

2.027.14c उर्वश्यामभयं ज्योतिरिन्द्र मा नो दीर्घा अभि नशन्तमिस्राः ॥

2.027.14a adite mitra varuṇota mṛḷa yad vo vayaṁ cakṛmā kac cid āgaḥ |
2.027.14c urv aśyām abhayaṁ jyotir indra mā no dīrghā abhi naśan tamisrāḥ ||

2.027.15a उभे अस्मै पीपयतः समीची दिवो वृष्टिं सुभगो नाम पुष्यन् ।

2.027.15c उभा क्षयावाजयन्याति पृत्सूभावर्धौ भवतः साधू अस्मै ॥

2.027.15a ubhe asmai pīpayataḥ samīcī divo vṛṣṭiṁ subhago nāma puṣyan |
2.027.15c ubhā kṣayāv ājayan yāti pṛtsūbhāv ardhau bhavataḥ sādhū asmai ||

2.027.16a या वो माया अभिद्रुहे यजत्राः पाशा आदित्या रिपवे विचृत्ताः ।

2.027.16c अश्वीव ताँ अति येषं रथेनारिष्टा उरावा शर्मन्स्याम ॥

2.027.16a yā vo māyā abhidruhe yajatrāḥ pāśā ādityā ripave vicṛttāḥ |
2.027.16c aśvīva tām̐ ati yeṣaṁ rathenāriṣṭā urāv ā śarman syāma ||

2.027.17a माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः ।

2.027.17c मा रायो राजन्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः ॥

2.027.17a māham maghono varuṇa priyasya bhūridāvna ā vidaṁ śūnam āpeḥ |
2.027.17c mā rāyo rājan suyamād ava sthām bṛhad vadema vidathe suvīrāḥ ||

2.028.01a इदं कवेरादित्यस्य स्वराजो विश्वानि सान्त्यभ्यस्तु मह्ना ।

2.028.01c अति यो मन्द्रो यजथाय देवः सुकीर्तिं भिक्षे वरुणस्य भूरेः ॥

2.028.01a idaṁ kaver ādityasya svarājo viśvāni sānty abhy astu mahnā |
2.028.01c ati yo mandro yajathāya devaḥ sukīrtim bhikṣe varuṇasya bhūreḥ ||

2.028.02a तव व्रते सुभगासः स्याम स्वाध्यो वरुण तुष्टुवांसः ।

2.028.02c उपायन उषसां गोमतीनामग्नयो न जरमाणा अनु द्यून् ॥

2.028.02a tava vrate subhagāsaḥ syāma svādhyo varuṇa tuṣṭuvāṁsaḥ |
2.028.02c upāyana uṣasāṁ gomatīnām agnayo na jaramāṇā anu dyūn ||

2.028.03a तव स्याम पुरुवीरस्य शर्मन्नुरुशंसस्य वरुण प्रणेतः ।

2.028.03c यूयं नः पुत्रा अदितेरदब्धा अभि क्षमध्वं युज्याय देवाः ॥

2.028.03a tava syāma puruvīrasya śarmann uruśaṁsasya varuṇa praṇetaḥ |
2.028.03c yūyaṁ naḥ putrā aditer adabdhā abhi kṣamadhvaṁ yujyāya devāḥ ||

2.028.04a प्र सीमादित्यो असृजद्विधर्ताँ ऋतं सिन्धवो वरुणस्य यन्ति ।

2.028.04c न श्राम्यन्ति न वि मुचन्त्येते वयो न पप्तू रघुया परिज्मन् ॥

2.028.04a pra sīm ādityo asṛjad vidhartām̐ ṛtaṁ sindhavo varuṇasya yanti |
2.028.04c na śrāmyanti na vi mucanty ete vayo na paptū raghuyā parijman ||

2.028.05a वि मच्छ्रथाय रशनामिवाग ऋध्याम ते वरुण खामृतस्य ।

2.028.05c मा तन्तुश्छेदि वयतो धियं मे मा मात्रा शार्यपसः पुर ऋतोः ॥

2.028.05a vi mac chrathāya raśanām ivāga ṛdhyāma te varuṇa khām ṛtasya |
2.028.05c mā tantuś chedi vayato dhiyam me mā mātrā śāry apasaḥ pura ṛtoḥ ||

2.028.06a अपो सु म्यक्ष वरुण भियसं मत्सम्राळृतावोऽनु मा गृभाय ।

2.028.06c दामेव वत्साद्वि मुमुग्ध्यंहो नहि त्वदारे निमिषश्चनेशे ॥

2.028.06a apo su myakṣa varuṇa bhiyasam mat samrāḻ ṛtāvo 'nu mā gṛbhāya |
2.028.06c dāmeva vatsād vi mumugdhy aṁho nahi tvad āre nimiṣaś caneśe ||

2.028.07a मा नो वधैर्वरुण ये त इष्टावेनः कृण्वन्तमसुर भ्रीणन्ति ।

2.028.07c मा ज्योतिषः प्रवसथानि गन्म वि षू मृधः शिश्रथो जीवसे नः ॥

2.028.07a mā no vadhair varuṇa ye ta iṣṭāv enaḥ kṛṇvantam asura bhrīṇanti |
2.028.07c mā jyotiṣaḥ pravasathāni ganma vi ṣū mṛdhaḥ śiśratho jīvase naḥ ||

2.028.08a नमः पुरा ते वरुणोत नूनमुतापरं तुविजात ब्रवाम ।

2.028.08c त्वे हि कं पर्वते न श्रितान्यप्रच्युतानि दूळभ व्रतानि ॥

2.028.08a namaḥ purā te varuṇota nūnam utāparaṁ tuvijāta bravāma |
2.028.08c tve hi kam parvate na śritāny apracyutāni dūlabha vratāni ||

2.028.09a पर ऋणा सावीरध मत्कृतानि माहं राजन्नन्यकृतेन भोजम् ।

2.028.09c अव्युष्टा इन्नु भूयसीरुषास आ नो जीवान्वरुण तासु शाधि ॥

2.028.09a para ṛṇā sāvīr adha matkṛtāni māhaṁ rājann anyakṛtena bhojam |
2.028.09c avyuṣṭā in nu bhūyasīr uṣāsa ā no jīvān varuṇa tāsu śādhi ||

2.028.10a यो मे राजन्युज्यो वा सखा वा स्वप्ने भयं भीरवे मह्यमाह ।

2.028.10c स्तेनो वा यो दिप्सति नो वृको वा त्वं तस्माद्वरुण पाह्यस्मान् ॥

2.028.10a yo me rājan yujyo vā sakhā vā svapne bhayam bhīrave mahyam āha |
2.028.10c steno vā yo dipsati no vṛko vā tvaṁ tasmād varuṇa pāhy asmān ||

2.028.11a माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः ।

2.028.11c मा रायो राजन्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः ॥

2.028.11a māham maghono varuṇa priyasya bhūridāvna ā vidaṁ śūnam āpeḥ |
2.028.11c mā rāyo rājan suyamād ava sthām bṛhad vadema vidathe suvīrāḥ ||

2.029.01a धृतव्रता आदित्या इषिरा आरे मत्कर्त रहसूरिवागः ।

2.029.01c शृण्वतो वो वरुण मित्र देवा भद्रस्य विद्वाँ अवसे हुवे वः ॥

2.029.01a dhṛtavratā ādityā iṣirā āre mat karta rahasūr ivāgaḥ |
2.029.01c śṛṇvato vo varuṇa mitra devā bhadrasya vidvām̐ avase huve vaḥ ||

2.029.02a यूयं देवाः प्रमतिर्यूयमोजो यूयं द्वेषांसि सनुतर्युयोत ।

2.029.02c अभिक्षत्तारो अभि च क्षमध्वमद्या च नो मृळयतापरं च ॥

2.029.02a yūyaṁ devāḥ pramatir yūyam ojo yūyaṁ dveṣāṁsi sanutar yuyota |
2.029.02c abhikṣattāro abhi ca kṣamadhvam adyā ca no mṛlayatāparaṁ ca ||

2.029.03a किमू नु वः कृणवामापरेण किं सनेन वसव आप्येन ।

2.029.03c यूयं नो मित्रावरुणादिते च स्वस्तिमिन्द्रामरुतो दधात ॥

2.029.03a kim ū nu vaḥ kṛṇavāmāpareṇa kiṁ sanena vasava āpyena |
2.029.03c yūyaṁ no mitrāvaruṇādite ca svastim indrāmaruto dadhāta ||

2.029.04a हये देवा यूयमिदापय स्थ ते मृळत नाधमानाय मह्यम् ।
2.029.04c मा वो रथो मध्यमवाळृते भून्मा युष्मावत्स्वापिषु श्रमिष्म ॥

2.029.04a haye devā yūyam id āpaya stha te mṛlata nādhamānāya mahyam |
2.029.04c mā vo ratho madhyamavāḷ ṛte bhūn mā yuṣmāvatsv āpiṣu śramiṣma ||

2.029.05a प्र व एको मिमय भूर्यागो यन्मा पितेव कितवं शशास ।
2.029.05c आरे पाशा आरे अघानि देवा मा माधि पुत्रे विमिव ग्रभीष्ट ॥

2.029.05a pra va eko mimaya bhūry āgo yan mā piteva kitavaṁ śaśāsa |
2.029.05c āre pāśā āre aghāni devā mā mādhi putre vim iva grabhīṣṭa ||

2.029.06a अर्वाञ्चो अद्या भवता यजत्रा आ वो हार्दि भयमानो व्ययेयम् ।
2.029.06c त्राध्वं नो देवा निजुरो वृकस्य त्राध्वं कर्तादवपदो यजत्राः ॥

2.029.06a arvāñco adyā bhavatā yajatrā ā vo hārdi bhayamāno vyayeyam |
2.029.06c trādhvaṁ no devā nijuro vṛkasya trādhvaṁ kartād avapado yajatrāḥ ||

2.029.07a माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः ।
2.029.07c मा रायो राजन्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः ॥

2.029.07a māham maghono varuṇa priyasya bhūridāvna ā vidaṁ śūnam āpeḥ |
2.029.07c mā rāyo rājan suyamād ava sthām bṛhad vadema vidathe suvīrāḥ ||

2.030.01a ऋतं देवाय कृण्वते सवित्र इन्द्रायाहिघ्ने न रमन्त आपः ।
2.030.01c अहरहर्यात्यक्तुरपां कियात्या प्रथमः सर्ग आसाम् ॥

2.030.01a ṛtaṁ devāya kṛṇvate savitra indrāyāhighne na ramanta āpaḥ |
2.030.01c ahar-ahar yāty aktur apāṁ kiyāty ā prathamaḥ sarga āsām ||

2.030.02a यो वृत्राय सिनमत्राभरिष्यत्प्र तं जनित्री विदुष उवाच ।
2.030.02c पथो रदन्तीरनु जोषमस्मै दिवेदिवे धुनयो यन्त्यर्थम् ॥

2.030.02a yo vṛtrāya sinam atrābhariṣyat pra taṁ janitrī viduṣa uvāca |
2.030.02c patho radantīr anu joṣam asmai dive-dive dhunayo yanty artham ||

2.030.03a ऊर्ध्वो ह्यस्थादध्यन्तरिक्षेऽधा वृत्राय प्र वधं जभार ।

2.030.03c मिहं वसान उप हीमदुद्रोत्तिग्मायुधो अजयच्छत्रुमिन्द्रः ॥

2.030.03a ūrdhvo hy asthād adhy antarikṣe 'dhā vṛtrāya pra vadhaṁ jabhāra |
2.030.03c mihaṁ vasāna upa hīm adudrot tigmāyudho ajayac chatrum indraḥ ||

2.030.04a बृहस्पते तपुषाश्नेव विध्य वृकद्वरसो असुरस्य वीरान् ।

2.030.04c यथा जघन्थ धृषता पुरा चिदेवा जहि शत्रुमस्माकमिन्द्र ॥

2.030.04a bṛhaspate tapuṣāśneva vidhya vṛkadvaraso asurasya vīrān |
2.030.04c yathā jaghantha dhṛṣatā purā cid evā jahi śatrum asmākam indra ||

2.030.05a अव क्षिप दिवो अश्मानमुच्चा येन शत्रुं मन्दसानो निजूर्वाः ।

2.030.05c तोकस्य सातौ तनयस्य भूरेरस्माँ अर्धं कृणुतादिन्द्र गोनाम् ॥

2.030.05a ava kṣipa divo aśmānam uccā yena śatrum mandasāno nijūrvāḥ |
2.030.05c tokasya sātau tanayasya bhūrer asmām̐ ardhaṁ kṛṇutād indra gonām ||

2.030.06a प्र हि क्रतुं वृहथो यं वनुथो रध्रस्य स्थो यजमानस्य चोदौ ।

2.030.06c इन्द्रासोमा युवमस्माँ अविष्टमस्मिन्भयस्थे कृणुतमु लोकम् ॥

2.030.06a pra hi kratuṁ vṛhatho yaṁ vanutho radhrasya stho yajamānasya codau |
2.030.06c indrāsomā yuvam asmām̐ aviṣṭam asmin bhayasthe kṛṇutam u lokam ||

2.030.07a न मा तमन्न श्रमन्नोत तन्द्रन्न वोचाम मा सुनोतेति सोमम् ।

2.030.07c यो मे पृणाद्यो ददद्यो निबोधाद्यो मा सुन्वन्तमुप गोभिरायत् ॥

2.030.07a na mā taman na śraman nota tandran na vocāma mā sunoteti somam |
2.030.07c yo me pṛṇād yo dadad yo nibodhād yo mā sunvantam upa gobhir āyat ||

2.030.08a सरस्वति त्वमस्माँ अविड्ढि मरुत्वती धृषती जेषि शत्रून् ।

2.030.08c त्यं चिच्छर्धन्तं तविषीयमाणमिन्द्रो हन्ति वृषभं शण्डिकानाम् ॥

2.030.08a sarasvati tvam asmām̐ aviḍḍhi marutvatī dhṛṣatī jeṣi śatrūn |
2.030.08c tyaṁ cic chardhantaṁ taviṣīyamāṇam indro hanti vṛṣabhaṁ śaṇḍikānām ||

2.030.09a यो नः सनुत्य उत वा जिघत्नुरभिख्याय तं तिगितेन विध्य ।

2.030.09c बृहस्पत आयुधैर्जेषि शत्रून्द्रुहे रीषन्तं परि धेहि राजन् ॥

2.030.09a yo naḥ sanutya uta vā jighatnur abhikhyāya taṁ tigitena vidhya |
2.030.09c bṛhaspata āyudhair jeṣi śatrūn druhe rīṣantam pari dhehi rājan ||

2.030.10a अस्माकेभिः सत्वभिः शूर शूरैर्वीर्या कृधि यानि ते कर्त्वानि ।

2.030.10c ज्योगभूवन्ननुधूपितासो हत्वी तेषामा भरा नो वसूनि ॥

2.030.10a asmākebhiḥ satvabhiḥ śūra śūrair vīryā kṛdhi yāni te kartvāni |
2.030.10c jyog abhūvann anudhūpitāso hatvī teṣām ā bharā no vasūni ||

2.030.11a तं वः शर्धं मारुतं सुम्नयुर्गिरोप ब्रुवे नमसा दैव्यं जनम् ।

2.030.11c यथा रयिं सर्ववीरं नशामहा अपत्यसाचं श्रुत्यं दिवेदिवे ॥

2.030.11a taṁ vaḥ śardham mārutaṁ sumnayur giropa bruve namasā daivyaṁ janam |
2.030.11c yathā rayiṁ sarvavīraṁ naśāmahā apatyasācaṁ śrutyaṁ dive-dive ||

2.031.01a अस्माकं मित्रावरुणावतं रथमादित्यै रुद्रैर्वसुभिः सचाभुवा ।

2.031.01c प्र यद्वयो न पप्तन्वस्मनस्परि श्रवस्यवो हृषीवन्तो वनर्षदः ॥

2.031.01a asmākam mitrāvaruṇāvataṁ ratham ādityai rudrair vasubhiḥ sacābhuvā |
2.031.01c pra yad vayo na paptan vasmanas pari śravasyavo hṛṣīvanto vanarṣadaḥ ||

2.031.02a अध स्मा न उदवता सजोषसो रथं देवासो अभि विक्षु वाजयुम् ।

2.031.02c यदाशवः पद्याभिस्तित्रतो रजः पृथिव्याः सानौ जङ्घनन्त पाणिभिः ॥

2.031.02a adha smā na ud avatā sajoṣaso rathaṁ devāso abhi vikṣu vājayum |
2.031.02c yad āśavaḥ padyābhis titrato rajaḥ pṛthivyāḥ sānau jaṅghananta pāṇibhiḥ ||

2.031.03a उत स्य न इन्द्रो विश्वचर्षणिर्दिवः शर्धेन मारुतेन सुक्रतुः ।

2.031.03c अनु नु स्थात्यवृकाभिरूतिभी रथं महे सनये वाजसातये ॥

2.031.03a uta sya na indro viśvacarṣaṇir divaḥ śardhena mārutena sukratuḥ |
2.031.03c anu nu sthāty avṛkābhir ūtibhī ratham mahe sanaye vājasātaye ||

2.031.04a उत स्य देवो भुवनस्य सक्षणिस्त्वष्टा ग्नाभिः सजोषा जूजुवद्रथम् ।

2.031.04c इळा भगो बृहद्दिवोत रोदसी पूषा पुरंधिरश्विनावधा पती ॥

2.031.04a uta sya devo bhuvanasya sakṣaṇis tvaṣṭā gnābhiḥ sajoṣā jūjuvad ratham |
2.031.04c iḷā bhago bṛhaddivota rodasī pūṣā purandhir aśvināv adhā patī ||

2.031.05a उत त्ये देवी सुभगे मिथूदृशोषासानक्ता जगतामपीजुवा ।

2.031.05c स्तुषे यद्वां पृथिवि नव्यसा वच स्थातुश्च वयस्त्रिवया उपस्तिरे ॥

2.031.05a uta tye devī subhage mithūdṛśoṣāsānaktā jagatām apījuvā |
2.031.05c stuṣe yad vām pṛthivi navyasā vaca sthātuś ca vayas trivayā upastire ||

2.031.06a उत वः शंसमुशिजामिव श्मस्यहिर्बुध्न्यो३ऽज एकपादुत ।

2.031.06c त्रित ऋभुक्षाः सविता चनो दधेऽपां नपादाशुहेमा धिया शमि ॥

2.031.06a uta vaḥ śaṁsam uśijām iva śmasy ahir budhnyo3 'ja ekapād uta |
2.031.06c trita ṛbhukṣāḥ savitā cano dadhe 'pāṁ napād āśuhemā dhiyā śami ||

2.031.07a एता वो वश्म्युद्यता यजत्रा अतक्षन्नायवो नव्यसे सम् ।

2.031.07c श्रवस्यवो वाजं चकानाः सप्तिर्न रथ्यो अह धीतिमश्याः ॥

2.031.07a etā vo vaśmy udyatā yajatrā atakṣann āyavo navyase sam |
2.031.07c śravasyavo vājaṁ cakānāḥ saptir na rathyo aha dhītim aśyāḥ ||

2.032.01a अस्य मे द्यावापृथिवी ऋतायतो भूतमवित्री वचसः सिषासतः ।

2.032.01c ययोरायुः प्रतरं ते इदं पुर उपस्तुते वसूयुर्वां महो दधे ॥

2.032.01a asya me dyāvāpṛthivī ṛtāyato bhūtam avitrī vacasaḥ siṣāsataḥ |
2.032.01c yayor āyuḥ prataraṁ te idam pura upastute vasūyur vām maho dadhe ||

2.032.02a मा नो गुह्या रिप आयोरहन्दभन्मा न आभ्यो रीरधो दुच्छुनाभ्यः ।

2.032.02c मा नो वि यौः सख्या विद्धि तस्य नः सुम्नायता मनसा तत्त्वेमहे ॥

2.032.02a mā no guhyā ripa āyor ahan dabhan mā na ābhyo rīradho ducchunābhyaḥ |
2.032.02c mā no vi yauḥ sakhyā viddhi tasya naḥ sumnāyatā manasā tat tvemahe ||

2.032.03a अहेळता मनसा श्रुष्टिमा वह दुहानां धेनुं पिप्युषीमसश्चतम् ।

2.032.03c पद्याभिराशुं वचसा च वाजिनं त्वां हिनोमि पुरुहूत विश्वहा ॥

2.032.03a aheḷatā manasā śruṣṭim ā vaha duhānāṁ dhenum pipyuṣīm asaścatam |
2.032.03c padyābhir āśuṁ vacasā ca vājinaṁ tvāṁ hinomi puruhūta viśvahā ||

2.032.04a राकामहं सुहवां सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना ।

2.032.04c सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वीरं शतदायमुक्थ्यम् ॥

2.032.04a rākām aham suhavām suṣṭutī huve śṛṇotu naḥ subhagā bodhatu tmanā |
2.032.04c sīvyatv apaḥ sūcyācchidyamānayā dadātu vīraṁ śatadāyam ukthyam ||

2.032.05a यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि ।

2.032.05c ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा ॥

2.032.05a yās te rāke sumatayaḥ supeśaso yābhir dadāsi dāśuṣe vasūni |
2.032.05c tābhir no adya sumanā upāgahi sahasrapoṣaṁ subhage rarāṇā ||

2.032.06a सिनीवालि पृथुष्टुके या देवानामसि स्वसा ।

2.032.06c जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः ॥

2.032.06a sinīvāli pṛthuṣṭuke yā devānām asi svasā |
2.032.06c juṣasva havyam āhutam prajāṁ devi didiḍḍhi naḥ ||

2.032.07a या सुबाहुः स्वङ्गुरिः सुषूमा बहुसूवरी ।

2.032.07c तस्यै विश्पत्न्यै हविः सिनीवाल्यै जुहोतन ॥

2.032.07a yā subāhuḥ svaṅguriḥ suṣūmā bahusūvarī |
2.032.07c tasyai viśpatnyai haviḥ sinīvālyai juhotana ||

2.032.08a या गुङ्गूर्या सिनीवाली या राका या सरस्वती ।

2.032.08c इन्द्राणीमह्व ऊतये वरुणानीं स्वस्तये ॥

2.032.08a yā guṅgūr yā sinīvālī yā rākā yā sarasvatī |
2.032.08c indrāṇīm ahva ūtaye varuṇānīṁ svastaye ||

2.033.01a आ ते पितर्मरुतां सुम्नमेतु मा नः सूर्यस्य संदृशो युयोथाः ।

2.033.01c अभि नो वीरो अर्वति क्षमेत प्र जायेमहि रुद्र प्रजाभिः ॥

2.033.01a ā te pitar marutāṁ sumnam etu mā naḥ sūryasya sandṛśo yuyothāḥ |
2.033.01c abhi no vīro arvati kṣameta pra jāyemahi rudra prajābhiḥ ||

2.033.02a त्वादत्तेभी रुद्र शंतमेभिः शतं हिमा अशीय भेषजेभिः ।

2.033.02c व्य॑स्मद्द्वेषो॑ वि॒तरं॑ व्यंहो॒ व्यमी॑वाश्चातयस्वा॒ विषू॑चीः ॥

2.033.02a tvāda̍ttebhī rudra̱ śanta̍mebhiḥ śa̱taṁ himā̍ aśīya bheṣa̱jebhi̍ḥ |
2.033.02c vy a1̱smad dveṣo̍ vita̱raṁ vy aṁho̱ vy amī̍vāś cātayasvā̱ viṣū̍cīḥ ||

2.033.03a श्रेष्ठो॑ जा॒तस्य॑ रुद्र श्रि॒याऽसि॑ त॒वस्त॑मस्त॒वसां॑ वज्रबाहो ।

2.033.03c पर्षि॑ णः॒ पा॒रमंह॑सः स्व॒स्ति विश्वा॑ अ॒भी॑ती॒ रप॑सो युयोधि ॥

2.033.03a śreṣṭho̍ jā̱tasya̍ rudra śri̱yāsi̍ ta̱vasta̍mas ta̱vasā̍ṁ vajrabāho |
2.033.03c parṣi̍ ṇaḥ pā̱ram aṁha̍saḥ sva̱sti viśvā̍ a̱bhī̍tī̱ rapa̍so yuyodhi ||

2.033.04a मा त्वा॑ रुद्र चुक्रुधामा॒ नमो॑भि॒र्मा दुष्टु॑ती वृषभ॒ मा सहू॑ती ।

2.033.04c उन्नो॑ वी॒राँ अ॑र्पय भेष॒जेभि॑र्भि॒षक्त॑मं त्वा भि॒षजां॑ शृणोमि ॥

2.033.04a mā tvā̍ rudra cukrudhāmā̱ namo̍bhi̱r mā duṣṭu̍tī vṛṣabha̱ mā sahū̍tī |
2.033.04c un no̍ vī̱rā̐ṁ a̍rpaya bheṣa̱jebhi̍r bhi̱ṣakta̍maṁ tvā bhi̱ṣajā̍ṁ śṛṇomi ||

2.033.05a हवी॑मभि॒र्हव॑ते॒ यो ह॒विर्भि॒रव॒ स्तोमे॑भी रु॒द्रं दि॑षीय ।

2.033.05c ऋ॒दू॒दरः॑ सु॒हवो॒ मा नो॑ अ॒स्यै ब॒भ्रुः सु॒शिप्रो॑ रीरधन्म॒नायै॑ ॥

2.033.05a havī̍mabhi̱r hava̍te̱ yo ha̱virbhi̱r ava̱ stome̍bhī ru̱draṁ di̍ṣīya |
2.033.05c ṛ̱dū̱dara̍ḥ su̱havo̱ mā no̍ a̱syai ba̱bhruḥ su̱śipro̍ rīradhan ma̱nāyai̍ ||

2.033.06a उन्मा॑ ममन्द वृष॒भो म॒रुत्वा॒न्त्वक्षी॑यसा॒ वय॑सा॒ नाध॑मानम् ।

2.033.06c घृणी॑व च्छा॒याम॑र॒पा अ॒शी॑या॒ विवा॑सेयं रु॒द्रस्य॑ सु॒म्नम् ॥

2.033.06a un mā̍ mamanda vṛ̱ṣa̱bho ma̱rutvā̱n tvakṣī̍yasā̱ vaya̍sā̱ nādha̍mānam |
2.033.06c ghṛṇī̍va cchā̱yām a̍ra̱pā a̍śī̱yā vivā̍seyaṁ ru̱drasya̍ su̱mnam ||

2.033.07a क्व१॒ स्य ते॑ रुद्र मृळ॒याकु॒र्हस्तो॒ यो अस्ति॑ भेष॒जो जला॑षः ।

2.033.07c अ॒प॒भ॒र्ता रप॑सो॒ दैव्य॑स्या॒भी नु मा॑ वृषभ चक्षमीथाः ॥

2.033.07a kva1̱ sya te̍ rudra mṛḷa̱yāku̱r hasto̱ yo asti̍ bheṣa̱jo jalā̍ṣaḥ |
2.033.07c a̱pa̱bha̱rtā rapa̍so̱ daivya̍syā̱bhī nu mā̍ vṛṣabha cakṣamīthāḥ ||

2.033.08a प्र ब॒भ्रवे॑ वृष॒भाय॑ श्विती॒चे म॒हो म॒हीं सु॑ष्टु॒तिमी॑रयामि ।

2.033.08c न॒म॒स्या क॑ल्मली॒किनं॒ नमो॑भिर्गृणी॒मसि॑ त्वे॒षं रु॒द्रस्य॒ नाम॑ ॥

2.033.08a pra ba̱bhrave̍ vṛṣa̱bhāya̍ śvitī̱ce ma̱ho ma̱hīṁ su̍ṣṭu̱tim īrayāmi |

2.033.08c namasyā kalmalīkinaṁ namobhir gṛṇīmasi tveṣaṁ rudrasya nāma ||

2.033.09a स्थिरेभिरङ्गैः पुरुरूप उग्रो बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः ।

2.033.09c ईशानादस्य भुवनस्य भूरेर्न वा उ योषद्रुद्रादसुर्यम् ॥

2.033.09a sthirebhir aṅgaiḥ pururūpa ugro babhruḥ śukrebhiḥ pipiśe hiraṇyaiḥ |
2.033.09c īśānād asya bhuvanasya bhūrer na vā u yoṣad rudrād asuryam ||

2.033.10a अर्हन्बिभर्षि सायकानि धन्वार्हन्निष्कं यजतं विश्वरूपम् ।

2.033.10c अर्हन्निदं दयसे विश्वमभ्वं न वा ओजीयो रुद्र त्वदस्ति ॥

2.033.10a arhan bibharṣi sāyakāni dhanvārhan niṣkaṁ yajataṁ viśvarūpam |
2.033.10c arhann idaṁ dayase viśvam abhvaṁ na vā ojīyo rudra tvad asti ||

2.033.11a स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम् ।

2.033.11c मृळा जरित्रे रुद्र स्तवानोऽन्यं ते अस्मन्नि वपन्तु सेनाः ॥

2.033.11a stuhi śrutaṁ gartasadaṁ yuvānam mṛgaṁ na bhīmam upahatnum ugram |
2.033.11c mṛḷā jaritre rudra stavāno 'nyaṁ te asman ni vapantu senāḥ ||

2.033.12a कुमारश्चित्पितरं वन्दमानं प्रति नानाम रुद्रोपयन्तम् ।

2.033.12c भूरेर्दातारं सत्पतिं गृणीषे स्तुतस्त्वं भेषजा रास्यस्मे ॥

2.033.12a kumāraś cit pitaraṁ vandamānam prati nānāma rudropayantam |
2.033.12c bhūrer dātāraṁ satpatiṁ gṛṇīṣe stutas tvam bheṣajā rāsy asme ||

2.033.13a या वो भेषजा मरुतः शुचीनि या शंतमा वृषणो या मयोभु ।

2.033.13c यानि मनुरवृणीता पिता नस्ता शं च योश्च रुद्रस्य वश्मि ॥

2.033.13a yā vo bheṣajā marutaḥ śucīni yā śantamā vṛṣaṇo yā mayobhu |
2.033.13c yāni manur avṛṇītā pitā nas tā śaṁ ca yoś ca rudrasya vaśmi ||

2.033.14a परि णो हेती रुद्रस्य वृज्याः परि त्वेषस्य दुर्मतिर्मही गात् ।

2.033.14c अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृळ ॥

2.033.14a pari ṇo hetī rudrasya vṛjyāḥ pari tveṣasya durmatir mahī gāt |
2.033.14c ava sthirā maghavadbhyas tanuṣva mīḍhvas tokāya tanayāya mṛḷa ||

2.033.15a एवा बभ्रो वृषभ चेकितान यथा देव न हृणीषे न हंसि ।

2.033.15c हवनश्रुन्नो रुद्रेह बोधि बृहद्वदेम विदथे सुवीराः ॥

2.033.15a evā babhro vṛṣabha cekitāna yathā deva na hṛṇīṣe na haṁsi |
2.033.15c havanaśrun no rudreha bodhi bṛhad vadema vidathe suvīrāḥ ||

2.034.01a धारावरा मरुतो धृष्ण्वोजसो मृगा न भीमास्तविषीभिरर्चिनः ।

2.034.01c अग्नयो न शुशुचाना ऋजीषिणो भृमिं धमन्तो अप गा अवृण्वत ॥

2.034.01a dhārāvarā maruto dhṛṣṇvojaso mṛgā na bhīmās taviṣībhir arcinaḥ |
2.034.01c agnayo na śuśucānā ṛjīṣiṇo bhṛmiṁ dhamanto apa gā avṛṇvata ||

2.034.02a द्यावो न स्तृभिश्चितयन्त खादिनो व्यभ्रिया न द्युतयन्त वृष्टयः ।

2.034.02c रुद्रो यद्वो मरुतो रुक्मवक्षसो वृषाजनि पृश्न्याः शुक्र ऊधनि ॥

2.034.02a dyāvo na stṛbhiś citayanta khādino vy a1bhriyā na dyutayanta vṛṣṭayaḥ |
2.034.02c rudro yad vo maruto rukmavakṣaso vṛṣājani pṛśnyāḥ śukra ūdhani ||

2.034.03a उक्षन्ते अश्वाँ अत्याँ इवाजिषु नदस्य कर्णैस्तुरयन्त आशुभिः ।

2.034.03c हिरण्यशिप्रा मरुतो दविध्वतः पृक्षं याथ पृषतीभिः समन्यवः ॥

2.034.03a ukṣante aśvām̐ atyām̐ ivājiṣu nadasya karṇais turayanta āśubhiḥ |
2.034.03c hiraṇyaśiprā maruto davidhvataḥ pṛkṣaṁ yātha pṛṣatībhiḥ samanyavaḥ ||

2.034.04a पृक्षे ता विश्वा भुवना ववक्षिरे मित्राय वा सदमा जीरदानवः ।

2.034.04c पृषदश्वासो अनवभ्रराधस ऋजिप्यासो न वयुनेषु धूर्षदः ॥

2.034.04a pṛkṣe tā viśvā bhuvanā vavakṣire mitrāya vā sadam ā jīradānavaḥ |
2.034.04c pṛṣadaśvāso anavabhrarādhasa ṛjipyāso na vayuneṣu dhūrṣadaḥ ||

2.034.05a इन्धन्वभिर्धेनुभी रप्शदूधभिरध्वस्मभिः पथिभिर्भ्राजदृष्टयः ।

2.034.05c आ हंसासो न स्वसराणि गन्तन मधोर्मदाय मरुतः समन्यवः ॥

2.034.05a indhanvabhir dhenubhī rapśadūdhabhir adhvasmabhiḥ pathibhir bhrājadṛṣṭayaḥ |
2.034.05c ā haṁsāso na svasarāṇi gantana madhor madāya marutaḥ samanyavaḥ ||

2.034.06a आ नो ब्रह्माणि मरुतः समन्यवो नरां न शंसः सवनानि गन्तन ।

2.034.06c अश्वामिव पिप्यत धेनुमूधनि कर्ता धियं जरित्रे वाजपेशसम् ॥

2.034.06a ā no brahmāṇi marutaḥ samanyavo narāṁ na śaṁsaḥ savanāni gantana |
2.034.06c aśvām iva pipyata dhenum ūdhani kartā dhiyaṁ jaritre vājapeśasam ||

2.034.07a तं नो दात मरुतो वाजिनं रथ आपानं ब्रह्म चितयद्दिवेदिवे ।

2.034.07c इषं स्तोतृभ्यो वृजनेषु कारवे सनिं मेधामरिष्टं दुष्टरं सहः ॥

2.034.07a taṁ no dāta maruto vājinaṁ ratha āpānam brahma citayad dive-dive |
2.034.07c iṣaṁ stotṛbhyo vṛjaneṣu kārave sanim medhām ariṣṭaṁ duṣṭaraṁ sahaḥ ||

2.034.08a यद्युञ्जते मरुतो रुक्मवक्षसोऽश्वान्रथेषु भग आ सुदानवः ।

2.034.08c धेनुर्न शिश्वे स्वसरेषु पिन्वते जनाय रातहविषे महीमिषम् ॥

2.034.08a yad yuñjate maruto rukmavakṣaso 'śvān ratheṣu bhaga ā sudānavaḥ |
2.034.08c dhenur na śiśve svasareṣu pinvate janāya rātahaviṣe mahīm iṣam ||

2.034.09a यो नो मरुतो वृकताति मर्त्यो रिपुर्दधे वसवो रक्षता रिषः ।

2.034.09c वर्तयत तपुषा चक्रियाभि तमव रुद्रा अशसो हन्तना वधः ॥

2.034.09a yo no maruto vṛkatāti martyo ripur dadhe vasavo rakṣatā riṣaḥ |
2.034.09c vartayata tapuṣā cakriyābhi tam ava rudrā aśaso hantanā vadhaḥ ||

2.034.10a चित्रं तद्वो मरुतो याम चेकिते पृश्न्या यदूधरप्यापयो दुहुः ।

2.034.10c यद्वा निदे नवमानस्य रुद्रियास्त्रितं जराय जुरतामदाभ्याः ॥

2.034.10a citraṁ tad vo maruto yāma cekite pṛśnyā yad ūdhar apy āpayo duhuḥ |
2.034.10c yad vā nide navamānasya rudriyās tritaṁ jarāya juratām adābhyāḥ ||

2.034.11a तान्वो महो मरुत एवयाव्नो विष्णोरेषस्य प्रभृथे हवामहे ।

2.034.11c हिरण्यवर्णान्ककुहान्यतस्रुचो ब्रह्मण्यन्तः शंस्यं राध ईमहे ॥

2.034.11a tān vo maho maruta evayāvno viṣṇor eṣasya prabhṛthe havāmahe |
2.034.11c hiraṇyavarṇān kakuhān yatasruco brahmaṇyantaḥ śaṁsyaṁ rādha īmahe ||

2.034.12a ते दशग्वाः प्रथमा यज्ञमूहिरे ते नो हिन्वन्तूषसो व्युष्टिषु ।

2.034.12c उषा न रामीररुणैरपोर्णुते महो ज्योतिषा शुचता गोअर्णसा ॥

2.034.12a te daśagvāḥ prathamā yajñam ūhire te no hinvantūṣaso vyuṣṭiṣu |
2.034.12c uṣā na rāmīr aruṇair aporṇute maho jyotiṣā śucatā goarṇasā ||

2.034.13a ते क्षोणीभिररुणेभिर्नाञ्जिभी रुद्रा ऋतस्य सदनेषु वावृधुः ।

2.034.13c निमेघमाना अत्येन पाजसा सुश्चन्द्रं वर्णं दधिरे सुपेशसम् ॥

2.034.13a te kṣoṇībhir aruṇebhir nāñjibhī rudrā ṛtasya sadaneṣu vāvṛdhuḥ |
2.034.13c nimeghamānā atyena pājasā suścandraṁ varṇaṁ dadhire supeśasam ||

2.034.14a ताँ इयानो महि वरूथमूतय उप घेदेना नमसा गृणीमसि ।

2.034.14c त्रितो न यान्पञ्च होतॄनभिष्टय आववर्तदवराञ्चक्रियावसे ॥

2.034.14a tām̐ iyāno mahi varūtham ūtaya upa ghed enā namasā gṛṇīmasi |
2.034.14c trito na yān pañca hotṝn abhiṣṭaya āvavartad avarāñ cakriyāvase ||

2.034.15a यया रध्रं पारयथात्यंहो यया निदो मुञ्चथ वन्दितारम् ।

2.034.15c अर्वाची सा मरुतो या व ऊतिरो षु वाश्रेव सुमतिर्जिगातु ॥

2.034.15a yayā radhram pārayathāty aṁho yayā nido muñcatha vanditāram |
2.034.15c arvācī sā maruto yā va ūtir o ṣu vāśreva sumatir jigātu ||

2.035.01a उपेमसृक्षि वाजयुर्वचस्यां चनो दधीत नाद्यो गिरो मे ।

2.035.01c अपां नपादाशुहेमा कुवित्स सुपेशसस्करति जोषिषद्धि ॥

2.035.01a upem asṛkṣi vājayur vacasyāṁ cano dadhīta nādyo giro me |
2.035.01c apāṁ napād āśuhemā kuvit sa supeśasas karati joṣiṣad dhi ||

2.035.02a इमं स्वस्मै हृद आ सुतष्टं मन्त्रं वोचेम कुविदस्य वेदत् ।

2.035.02c अपां नपादसुर्यस्य मह्ना विश्वान्यर्यो भुवना जजान ॥

2.035.02a imaṁ sv asmai hṛda ā sutaṣṭam mantraṁ vocema kuvid asya vedat |
2.035.02c apāṁ napād asuryasya mahnā viśvāny aryo bhuvanā jajāna ||

2.035.03a समन्या यन्त्युप यन्त्यन्याः समानमूर्वं नद्यः पृणन्ति ।

2.035.03c तमू शुचिं शुचयो दीदिवांसमपां नपातं परि तस्थुरापः ॥

2.035.03a sam anyā yanty upa yanty anyāḥ samānam ūrvaṁ nadyaḥ pṛṇanti |
2.035.03c tam ū śuciṁ śucayo dīdivāṁsam apāṁ napātam pari tasthur āpaḥ ||

2.035.04a तमस्मेरा युवतयो युवानं मर्मृज्यमानाः परि यन्त्यापः ।

2.035.04c स शुक्रेभिः शिक्वभी रेवदस्मे दीदायानिध्मो घृतनिर्णिगप्सु ॥

2.035.04a tam asmerā yuvatayo yuvānam marmṛjyamānāḥ pari yanty āpaḥ |
2.035.04c sa śukrebhiḥ śikvabhī revad asme dīdāyānidhmo ghṛtanirṇig apsu ||

2.035.05a अस्मै तिस्रो अव्यथ्याय नारीर्देवाय देवीर्दिधिषन्त्यन्नम् ।

2.035.05c कृता इवोप हि प्रसर्स्रे अप्सु स पीयूषं धयति पूर्वसूनाम् ॥

2.035.05a asmai tisro avyathyāya nārīr devāya devīr didhiṣanty annam |
2.035.05c kṛtā ivopa hi prasarsre apsu sa pīyūṣaṁ dhayati pūrvasūnām ||

2.035.06a अश्वस्यात्र जनिमास्य च स्वर्द्रुहो रिषः सम्पृचः पाहि सूरीन् ।

2.035.06c आमासु पूर्षु परो अप्रमृष्यं नारातयो वि नशन्नानृतानि ॥

2.035.06a aśvasyātra janimāsya ca svar druho riṣaḥ sampṛcaḥ pāhi sūrīn |
2.035.06c āmāsu pūrṣu paro apramṛṣyaṁ nārātayo vi naśan nānṛtāni ||

2.035.07a स्व आ दमे सुदुघा यस्य धेनुः स्वधां पीपाय सुभ्वन्नमत्ति ।

2.035.07c सो अपां नपादूर्जयन्नप्स्व१न्तर्वसुदेयाय विधते वि भाति ॥

2.035.07a sva ā dame sudughā yasya dhenuḥ svadhām pīpāya subhv annam atti |
2.035.07c so apāṁ napād ūrjayann apsv a1ntar vasudeyāya vidhate vi bhāti ||

2.035.08a यो अप्स्वा शुचिना दैव्येन ऋतावाजस्र उर्विया विभाति ।

2.035.08c वया इदन्या भुवनान्यस्य प्र जायन्ते वीरुधश्च प्रजाभिः ॥

2.035.08a yo apsv ā śucinā daivyena ṛtāvājasra urviyā vibhāti |
2.035.08c vayā id anyā bhuvanāny asya pra jāyante vīrudhaś ca prajābhiḥ ||

2.035.09a अपां नपादा ह्यस्थादुपस्थं जिह्मानामूर्ध्वो विद्युतं वसानः ।

2.035.09c तस्य ज्येष्ठं महिमानं वहन्तीर्हिरण्यवर्णाः परि यन्ति यह्वीः ॥

2.035.09a apāṁ napād ā hy asthād upasthaṁ jihmānām ūrdhvo vidyutaṁ vasānaḥ |
2.035.09c tasya jyeṣṭham mahimānaṁ vahantīr hiraṇyavarṇāḥ pari yanti yahvīḥ ||

2.035.10a हिरण्यरूपः स हिरण्यसंदृगपां नपात्सेदु हिरण्यवर्णः ।

2.035.10c हिरण्ययात्परि योनेर्निषद्या हिरण्यदा ददत्यन्नमस्मै ॥

2.035.10a hiraṇyarūpaḥ sa hiraṇyasandṛg apāṁ napāt sed u hiraṇyavarṇaḥ |

2.035.10c hiraṇyayāt pari yoner niṣadyā hiraṇyadā dadaty annam asmai ||

2.035.11a तदस्यानीकमुत चारु नामापीच्यं वर्धते नप्तुरपाम् ।

2.035.11c यमिन्धते युवतयः समित्था हिरण्यवर्णं घृतमन्नमस्य ॥

2.035.11a tad asyānīkam uta cāru nāmāpīcyaṁ vardhate naptur apām |
2.035.11c yam indhate yuvatayaḥ sam itthā hiraṇyavarṇaṁ ghṛtam annam asya ||

2.035.12a अस्मै बहूनामवमाय सख्ये यज्ञैर्विधेम नमसा हविर्भिः ।

2.035.12c सं सानु मार्ज्मि दिधिषामि बिल्मैर्दधाम्यन्नैः परि वन्द ऋग्भिः ॥

2.035.12a asmai bahūnām avamāya sakhye yajñair vidhema namasā havirbhiḥ |
2.035.12c saṁ sānu mārjmi didhiṣāmi bilmair dadhāmy annaiḥ pari vanda ṛgbhiḥ ||

2.035.13a स ईं वृषाजनयत्तासु गर्भं स ईं शिशुर्धयति तं रिहन्ति ।

2.035.13c सो अपां नपादनभिम्लातवर्णोऽन्यस्येवेह तन्वा विवेष ॥

2.035.13a sa īṁ vṛṣājanayat tāsu garbhaṁ sa īṁ śiśur dhayati taṁ rihanti |
2.035.13c so apāṁ napād anabhimlātavarṇo 'nyasyeveha tanvā viveṣa ||

2.035.14a अस्मिन्पदे परमे तस्थिवांसमध्वस्मभिर्विश्वहा दीदिवांसम् ।

2.035.14c आपो नप्त्रे घृतमन्नं वहन्तीः स्वयमत्कैः परि दीयन्ति यह्वीः ॥

2.035.14a asmin pade parame tasthivāṁsam adhvasmabhir viśvahā dīdivāṁsam |
2.035.14c āpo naptre ghṛtam annaṁ vahantīḥ svayam atkaiḥ pari dīyanti yahvīḥ ||

2.035.15a अयांसमग्ने सुक्षितिं जनायायांसमु मघवद्भ्यः सुवृक्तिम् ।

2.035.15c विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥

2.035.15a ayāṁsam agne sukṣitiṁ janāyāyāṁsam u maghavadbhyaḥ suvṛktim |
2.035.15c viśvaṁ tad bhadraṁ yad avanti devā bṛhad vadema vidathe suvīrāḥ ||

2.036.01a तुभ्यं हिन्वानो वसिष्ट गा अपोऽधुक्षन्सीमविभिरद्रिभिर्नरः ।

2.036.01c पिबेन्द्र स्वाहा प्रहुतं वषट्कृतं होत्रादा सोमं प्रथमो य ईशिषे ॥

2.036.01a tubhyaṁ hinvāno vasiṣṭa gā apo 'dhukṣan sīm avibhir adribhir naraḥ |
2.036.01c pibendra svāhā prahutaṁ vaṣaṭkṛtaṁ hotrād ā somaṁ prathamo ya īśiṣe ||

2.036.02a यज्ञैः सम्मिश्लाः पृषतीभिर्ऋष्टिभिर्यामञ्छुभ्रासो अञ्जिषु प्रिया उत ।

2.036.02c आसद्या बर्हिर्भरतस्य सूनवः पोत्रादा सोमं पिबता दिवो नरः ॥

2.036.02a yajñaiḥ sammiślāḥ pṛṣatībhir ṛṣṭibhir yāmañ chubhrāso añjiṣu priyā uta |
2.036.02c āsadyā barhir bharatasya sūnavaḥ potrād ā somam pibatā divo naraḥ ||

2.036.03a अमेव नः सुहवा आ हि गन्तन नि बर्हिषि सदतना रणिष्टन ।

2.036.03c अथा मन्दस्व जुजुषाणो अन्धसस्त्वष्टर्देवेभिर्जनिभिः सुमद्गणः ॥

2.036.03a ameva naḥ suhavā ā hi gantana ni barhiṣi sadatanā raṇiṣṭana |
2.036.03c athā mandasva jujuṣāṇo andhasas tvaṣṭar devebhir janibhiḥ sumadgaṇaḥ ||

2.036.04a आ वक्षि देवाँ इह विप्र यक्षि चोशन्होतर्नि षदा योनिषु त्रिषु ।

2.036.04c प्रति वीहि प्रस्थितं सोम्यं मधु पिबाग्नीध्रात्तव भागस्य तृप्णुहि ॥

2.036.04a ā vakṣi devām̐ iha vipra yakṣi cośan hotar ni ṣadā yoniṣu triṣu |
2.036.04c prati vīhi prasthitaṁ somyam madhu pibāgnīdhrāt tava bhāgasya tṛpṇuhi ||

2.036.05a एष स्य ते तन्वो नृम्णवर्धनः सह ओजः प्रदिवि बाह्वोर्हितः ।

2.036.05c तुभ्यं सुतो मघवन्तुभ्यमाभृतस्त्वमस्य ब्राह्मणादा तृपत्पिब ॥

2.036.05a eṣa sya te tanvo nṛmṇavardhanaḥ saha ojaḥ pradivi bāhvor hitaḥ |
2.036.05c tubhyaṁ suto maghavan tubhyam ābhṛtas tvam asya brāhmaṇād ā tṛpat piba ||

2.036.06a जुषेथां यज्ञं बोधतं हवस्य मे सत्तो होता निविदः पूर्व्या अनु ।

2.036.06c अच्छा राजाना नम एत्यावृतं प्रशास्त्रादा पिबतं सोम्यं मधु ॥

2.036.06a juṣethāṁ yajñam bodhataṁ havasya me satto hotā nividaḥ pūrvyā anu |
2.036.06c acchā rājānā nama ety āvṛtam praśāstrād ā pibataṁ somyam madhu ||

2.037.01a मन्दस्व होत्रादनु जोषमन्धसोऽध्वर्यवः स पूर्णां वष्ट्यासिचम् ।

2.037.01c तस्मा एतं भरत तद्वशो ददिर्होत्रात्सोमं द्रविणोदः पिब ऋतुभिः ॥

2.037.01a mandasva hotrād anu joṣam andhaso 'dhvaryavaḥ sa pūrṇāṁ vaṣṭy āsicam |
2.037.01c tasmā etam bharata tadvaśo dadir hotrāt somaṁ draviṇodaḥ piba ṛtubhiḥ ||

2.037.02a यमु पूर्वमहुवे तमिदं हुवे सेदु हव्यो ददिर्यो नाम पत्यते ।

2.037.02c अध्वर्युभिः प्रस्थितं सोम्यं मधु पोत्रात्सोमं द्रविणोदः पिब ऋतुभिः ॥

2.037.02a yam u pūrvam ahuve tam idaṁ huve sed u havyo dadir yo nāma patyate ।
2.037.02c adhvaryubhiḥ prasthitaṁ somyam madhu potrāt somaṁ draviṇodaḥ piba ṛtubhiḥ ।।

2.037.03a मेद्यन्तु ते वह्नयो येभिरीयसेऽरिषण्यन्वीळयस्वा वनस्पते ।

2.037.03c आयूया धृष्णो अभिगूर्या त्वं नेष्ट्रात्सोमं द्रविणोदः पिब ऋतुभिः ॥

2.037.03a medyantu te vahnayo yebhir īyase 'riṣaṇyan vīḷayasvā vanaspate ।
2.037.03c āyūyā dhṛṣṇo abhigūryā tvaṁ neṣṭrāt somaṁ draviṇodaḥ piba ṛtubhiḥ ।।

2.037.04a अपाद्धोत्रादुत पोत्रादमत्तोत नेष्ट्रादजुषत प्रयो हितम् ।

2.037.04c तुरीयं पात्रममृक्तममर्त्यं द्रविणोदाः पिबतु द्राविणोदसः ॥

2.037.04a apād dhotrād uta potrād amattota neṣṭrād ajuṣata prayo hitam ।
2.037.04c turīyam pātram amṛktam amartyaṁ draviṇodāḥ pibatu drāviṇodasaḥ ।।

2.037.05a अर्वाञ्चमद्य यय्यं नृवाहणं रथं युञ्जाथामिह वां विमोचनम् ।

2.037.05c पृङ्क्तं हवींषि मधुना हि कं गतमथा सोमं पिबतं वाजिनीवसू ॥

2.037.05a arvāñcam adya yayyaṁ nṛvāhaṇaṁ rathaṁ yuñjāthām iha vāṁ vimocanam ।
2.037.05c pṛṅktaṁ havīṁṣi madhunā hi kaṁ gatam athā somam pibataṁ vājinīvasū ।।

2.037.06a जोष्यग्ने समिधं जोष्याहुतिं जोषि ब्रह्म जन्यं जोषि सुष्टुतिम् ।

2.037.06c विश्वेभिर्विश्वाँ ऋतुना वसो मह उशन्देवाँ उशतः पायया हविः ॥

2.037.06a joṣy agne samidhaṁ joṣy āhutiṁ joṣi brahma janyaṁ joṣi suṣṭutim ।
2.037.06c viśvebhir viśvām̐ ṛtunā vaso maha uśan devām̐ uśataḥ pāyayā haviḥ ।।

2.038.01a उदु ष्य देवः सविता सवाय शश्वत्तमं तदपा वह्निरस्थात् ।

2.038.01c नूनं देवेभ्यो वि हि धाति रत्नमथाभजद्वीतिहोत्रं स्वस्तौ ॥

2.038.01a ud u ṣya devaḥ savitā savāya śaśvattamaṁ tadapā vahnir asthāt ।
2.038.01c nūnaṁ devebhyo vi hi dhāti ratnam athābhajad vītihotraṁ svastau ।।

2.038.02a विश्वस्य हि श्रुष्टये देव ऊर्ध्वः प्र बाहवा पृथुपाणिः सिसर्ति ।

2.038.02c आपश्चिदस्य व्रत आ निमृग्रा अयं चिद्वातो रमते परिज्मन् ॥

2.038.02a viśvasya hi śruṣṭaye deva ūrdhvaḥ pra bāhavā pṛthupāṇiḥ sisarti |
2.038.02c āpaś cid asya vrata ā nimṛgrā ayaṁ cid vāto ramate parijman ||

2.038.03a आशुभिश्चिद्यान्वि मुचाति नूनमरीरमदतमानं चिदेतोः ।

2.038.03c अह्यर्षूणां चिन्न्ययाँ अविष्यामनु व्रतं सवितुर्मोक्यागात् ॥

2.038.03a āśubhiś cid yān vi mucāti nūnam arīramad atamānaṁ cid etoḥ |
2.038.03c ahyarṣūṇāṁ cin ny ayām̐ aviṣyām anu vrataṁ savitur moky āgāt ||

2.038.04a पुनः समव्यद्विततं वयन्ती मध्या कर्तोर्न्यधाच्छक्म धीरः ।

2.038.04c उत्संहायास्थाद्व्यृ१तूँरदर्धररमतिः सविता देव आगात् ॥

2.038.04a punaḥ sam avyad vitataṁ vayantī madhyā kartor ny adhāc chakma dhīraḥ |
2.038.04c ut saṁhāyāsthād vy ṛ1tūm̐r adardhar aramatiḥ savitā deva āgāt ||

2.038.05a नानौकांसि दुर्यो विश्वमायुर्वि तिष्ठते प्रभवः शोको अग्नेः ।

2.038.05c ज्येष्ठं माता सूनवे भागमाधादन्वस्य केतमिषितं सवित्रा ॥

2.038.05a nānaukāṁsi duryo viśvam āyur vi tiṣṭhate prabhavaḥ śoko agneḥ |
2.038.05c jyeṣṭham mātā sūnave bhāgam ādhād anv asya ketam iṣitaṁ savitrā ||

2.038.06a समाववर्ति विष्ठितो जिगीषुर्विश्वेषां कामश्चरताममाभूत् ।

2.038.06c शश्वाँ अपो विकृतं हित्व्यागादनु व्रतं सवितुर्दैव्यस्य ॥

2.038.06a samāvavarti viṣṭhito jigīṣur viśveṣāṁ kāmaś caratām amābhūt |
2.038.06c śaśvām̐ apo vikṛtaṁ hitvy āgād anu vrataṁ savitur daivyasya ||

2.038.07a त्वया हितमप्यमप्सु भागं धन्वान्वा मृगयसो वि तस्थुः ।

2.038.07c वनानि विभ्यो नकिरस्य तानि व्रता देवस्य सवितुर्मिनन्ति ॥

2.038.07a tvayā hitam apyam apsu bhāgaṁ dhanvānv ā mṛgayaso vi tasthuḥ |
2.038.07c vanāni vibhyo nakir asya tāni vratā devasya savitur minanti ||

2.038.08a याद्राध्यं१ वरुणो योनिमप्यमनिशितं निमिषि जर्भुराणः ।

2.038.08c विश्वो मार्ताण्डो व्रजमा पशुर्गात्स्थशो जन्मानि सविता व्याकः ॥

2.038.08a yādrādhyaṁ1 varuṇo yonim apyam aniśitaṁ nimiṣi jarbhurāṇaḥ |
2.038.08c viśvo mārtāṇḍo vrajam ā paśur gāt sthaśo janmāni savitā vy ākaḥ ||

2.038.09a न यस्येन्द्रो वरुणो न मित्रो व्रतमर्यमा न मिनन्ति रुद्रः ।

2.038.09c नारातयस्तमिदं स्वस्ति हुवे देवं सवितारं नमोभिः ॥

2.038.09a na yasyendro varuṇo na mitro vratam aryamā na minanti rudraḥ |
2.038.09c nārātayas tam idaṁ svasti huve devaṁ savitāraṁ namobhiḥ ||

2.038.10a भगं धियं वाजयन्तः पुरंधिं नराशंसो ग्नास्पतिर्नो अव्याः ।

2.038.10c आये वामस्य संगथे रयीणां प्रिया देवस्य सवितुः स्याम ॥

2.038.10a bhagaṁ dhiyaṁ vājayantaḥ purandhiṁ narāśaṁso gnāspatir no avyāḥ |
2.038.10c āye vāmasya saṅgathe rayīṇām priyā devasya savituḥ syāma ||

2.038.11a अस्मभ्यं तद्दिवो अद्भ्यः पृथिव्यास्त्वया दत्तं काम्यं राध आ गात् ।

2.038.11c शं यत्स्तोतृभ्य आपये भवात्युरुशंसाय सवितर्जरित्रे ॥

2.038.11a asmabhyaṁ tad divo adbhyaḥ pṛthivyās tvayā dattaṁ kāmyaṁ rādha ā gāt |
2.038.11c śaṁ yat stotṛbhya āpaye bhavāty uruśaṁsāya savitar jaritre ||

2.039.01a ग्रावाणेव तदिदर्थं जरेथे गृध्रेव वृक्षं निधिमन्तमच्छ ।

2.039.01c ब्रह्माणेव विदथ उक्थशासा दूतेव हव्या जन्या पुरुत्रा ॥

2.039.01a grāvāṇeva tad id arthaṁ jarethe gṛdhreva vṛkṣaṁ nidhimantam accha |
2.039.01c brahmāṇeva vidatha ukthaśāsā dūteva havyā janyā purutrā ||

2.039.02a प्रातर्यावाणा रथ्येव वीराजेव यमा वरमा सचेथे ।

2.039.02c मेने इव तन्वा३ शुम्भमाने दम्पतीव क्रतुविदा जनेषु ॥

2.039.02a prātaryāvāṇā rathyeva vīrājeva yamā varam ā sacethe |
2.039.02c mene iva tanvā3 śumbhamāne dampatīva kratuvidā janeṣu ||

2.039.03a शृङ्गेव नः प्रथमा गन्तमर्वाक्छफाविव जर्भुराणा तरोभिः ।

2.039.03c चक्रवाकेव प्रति वस्तोरुस्रार्वाञ्चा यातं रथ्येव शक्रा ॥

2.039.03a śṛṅgeva naḥ prathamā gantam arvāk chaphāv iva jarbhurāṇā tarobhiḥ |
2.039.03c cakravākeva prati vastor usrārvāñcā yātaṁ rathyeva śakrā ||

2.039.04a नावेव नः पारयतं युगेव नभ्येव न उपधीव प्रधीव ।

2.039.04c श्वानेव नो अरिषण्या तनूनां खृगलेव विस्रसः पातमस्मान् ॥

2.039.04a nāveva naḥ pārayataṁ yugeva nabhyeva na upadhīva pradhīva |
2.039.04c śvāneva no ariṣaṇyā tanūnāṁ khṛgaleva visrasaḥ pātam asmān ||

2.039.05a वातेवाजुर्या नद्येव रीतिरक्षी इव चक्षुषा यातमर्वाक् ।

2.039.05c हस्ताविव तन्वे३ शम्भविष्ठा पादेव नो नयतं वस्यो अच्छ ॥

2.039.05a vātevājuryā nadyeva rītir akṣī iva cakṣuṣā yātam arvāk |
2.039.05c hastāv iva tanve3 śambhaviṣṭhā pādeva no nayataṁ vasyo accha ||

2.039.06a ओष्ठाविव मध्वास्ने वदन्ता स्तनाविव पिप्यतं जीवसे नः ।

2.039.06c नासेव नस्तन्वो रक्षितारा कर्णाविव सुश्रुता भूतमस्मे ॥

2.039.06a oṣṭhāv iva madhv āsne vadantā stanāv iva pipyataṁ jīvase naḥ |
2.039.06c nāseva nas tanvo rakṣitārā karṇāv iva suśrutā bhūtam asme ||

2.039.07a हस्तेव शक्तिमभि संददी नः क्षामेव नः समजतं रजांसि ।

2.039.07c इमा गिरो अश्विना युष्मयन्तीः क्ष्णोत्रेणेव स्वधितिं सं शिशीतम् ॥

2.039.07a hasteva śaktim abhi sandadī naḥ kṣāmeva naḥ sam ajataṁ rajāṁsi |
2.039.07c imā giro aśvinā yuṣmayantīḥ kṣṇotreṇeva svadhitiṁ saṁ śiśītam ||

2.039.08a एतानि वामश्विना वर्धनानि ब्रह्म स्तोमं गृत्समदासो अक्रन् ।

2.039.08c तानि नरा जुजुषाणोप यातं बृहद्वदेम विदथे सुवीराः ॥

2.039.08a etāni vām aśvinā vardhanāni brahma stomaṁ gṛtsamadāso akran |
2.039.08c tāni narā jujuṣāṇopa yātam bṛhad vadema vidathe suvīrāḥ ||

2.040.01a सोमापूषणा जनना रयीणां जनना दिवो जनना पृथिव्याः ।

2.040.01c जातौ विश्वस्य भुवनस्य गोपौ देवा अकृण्वन्नमृतस्य नाभिम् ॥

2.040.01a somāpūṣaṇā jananā rayīṇāṁ jananā divo jananā pṛthivyāḥ |
2.040.01c jātau viśvasya bhuvanasya gopau devā akṛṇvann amṛtasya nābhim ||

2.040.02a इमौ देवौ जायमानौ जुषन्तेमौ तमांसि गूहतामजुष्टा ।

2.040.02c आभ्यामिन्द्रः पक्वमामास्वन्तः सोमापूषभ्यां जनदुस्रियासु ॥

2.040.02a imau devau jāyamānau juṣantemau tamāṁsi gūhatām ajuṣṭā |
2.040.02c ābhyām indraḥ pakvam āmāsv antaḥ somāpūṣabhyāṁ janad usriyāsu ||

2.040.03a सोमापूषणा रजसो विमानं सप्तचक्रं रथमविश्वमिन्वम् ।

2.040.03c विषूवृतं मनसा युज्यमानं तं जिन्वथो वृषणा पञ्चरश्मिम् ॥

2.040.03a somāpūṣaṇā rajaso vimānaṁ saptacakraṁ ratham aviśvaminvam |
2.040.03c viṣūvṛtam manasā yujyamānaṁ taṁ jinvatho vṛṣaṇā pañcaraśmim ||

2.040.04a दिव्य१न्यः सदनं चक्र उच्चा पृथिव्यामन्यो अध्यन्तरिक्षे ।

2.040.04c तावस्मभ्यं पुरुवारं पुरुक्षुं रायस्पोषं वि ष्यतां नाभिमस्मे ॥

2.040.04a divy a1nyaḥ sadanaṁ cakra uccā pṛthivyām anyo adhy antarikṣe |
2.040.04c tāv asmabhyam puruvāram purukṣuṁ rāyas poṣaṁ vi ṣyatām nābhim asme ||

2.040.05a विश्वान्यन्यो भुवना जजान विश्वमन्यो अभिचक्षाण एति ।

2.040.05c सोमापूषणाववतं धियं मे युवाभ्यां विश्वाः पृतना जयेम ॥

2.040.05a viśvāny anyo bhuvanā jajāna viśvam anyo abhicakṣāṇa eti |
2.040.05c somāpūṣaṇāv avataṁ dhiyam me yuvābhyāṁ viśvāḥ pṛtanā jayema ||

2.040.06a धियं पूषा जिन्वतु विश्वमिन्वो रयिं सोमो रयिपतिर्दधातु ।

2.040.06c अवतु देव्यदितिरनर्वा बृहद्वदेम विदथे सुवीराः ॥

2.040.06a dhiyam pūṣā jinvatu viśvaminvo rayiṁ somo rayipatir dadhātu |
2.040.06c avatu devy aditir anarvā bṛhad vadema vidathe suvīrāḥ ||

2.041.01a वायो ये ते सहस्रिणो रथासस्तेभिरा गहि ।

2.041.01c नियुत्वान्सोमपीतये ॥

2.041.01a vāyo ye te sahasriṇo rathāsas tebhir ā gahi |
2.041.01c niyutvān somapītaye ||

2.041.02a नियुत्वान्वायवा गह्ययं शुक्रो अयामि ते ।

2.041.02c गन्तासि सुन्वतो गृहम् ॥

2.041.02a niyutvān vāyav ā gahy ayaṁ śukro ayāmi te |
2.041.02c gantāsi sunvato gṛham ||

2.041.03a शुक्रस्याद्य गवाशिर इन्द्रवायू नियुत्वतः ।

2.041.03c आ यातं पिबतं नरा ॥

2.041.03a śukrasyādya gavāśira indravāyū niyutvataḥ |
2.041.03c ā yātam pibataṁ narā ||

2.041.04a अयं वां मित्रावरुणा सुतः सोम ऋतावृधा ।

2.041.04c ममेदिह श्रुतं हवम् ॥

2.041.04a ayaṁ vām mitrāvaruṇā sutaḥ soma ṛtāvṛdhā |
2.041.04c mamed iha śrutaṁ havam ||

2.041.05a राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे ।

2.041.05c सहस्रस्थूण आसाते ॥

2.041.05a rājānāv anabhidruhā dhruve sadasy uttame |
2.041.05c sahasrasthūṇa āsāte ||

2.041.06a ता सम्राजा घृतासुती आदित्या दानुनस्पती ।

2.041.06c सचेते अनवह्वरम् ॥

2.041.06a tā samrājā ghṛtāsutī ādityā dānunas patī |
2.041.06c sacete anavahvaram ||

2.041.07a गोमदू षु नासत्याश्वावद्यातमश्विना ।

2.041.07c वर्ती रुद्रा नृपाय्यम् ॥

2.041.07a gomad ū ṣu nāsatyāśvāvad yātam aśvinā |
2.041.07c vartī rudrā nṛpāyyam ||

2.041.08a न यत्परो नान्तर आदधर्षद्वृषण्वसू ।

2.041.08c दुःशंसो मर्त्यो रिपुः ॥

2.041.08a na yat paro nāntara ādadharṣad vṛṣaṇvasū |
2.041.08c duḥśaṁso martyo ripuḥ ||

2.041.09a ता न आ वोळ्हमश्विना रयिं पिशङ्गसंदृशम् ।

2.041.09c धिष्ण्या॑ वरिवो॒विद॑म् ॥

2.041.09a tā na̱ ā vo̍ḻham aśvinā ra̱yim pi̱śaṅga̍sandṛśam |
2.041.09c dhiṣṇyā̍ varivo̱vida̍m ||

2.041.10a इन्द्रो॑ अ॒ङ्ग म॒हद्भ॒यम॒भी षदप॑ चुच्यवत् ।

2.041.10c स हि स्थि॒रो विच॑र्षणिः ॥

2.041.10a indro̍ a̱ṅga ma̱had bha̱yam a̱bhī ṣad apa̍ cucyavat |
2.041.10c sa hi sthi̱ro vica̍rṣaṇiḥ ||

2.041.11a इन्द्र॑श्च मृ॒ळया॑ति नो॒ न न॑ः प॒श्चाद॒घं न॑शत् ।

2.041.11c भ॒द्रं भ॑वाति नः पु॒रः ॥

2.041.11a indra̍ś ca mṛ̱ḻayā̍ti no̱ na na̍ḥ pa̱ścād a̱ghaṁ na̍śat |
2.041.11c bha̱dram bha̍vāti naḥ pu̱raḥ ||

2.041.12a इन्द्र॒ आशा॑भ्य॒स्परि॒ सर्वा॑भ्यो॒ अभ॑यं करत् ।

2.041.12c जेता॒ शत्रू॒न्विच॑र्षणिः ॥

2.041.12a indra̱ āśā̍bhya̱s pari̱ sarvā̍bhyo̱ abha̍yaṁ karat |
2.041.12c jetā̱ śatrū̱n vica̍rṣaṇiḥ ||

2.041.13a विश्वे॑ देवास॒ आ ग॑त शृणु॒ता म॑ इ॒मं हव॑म् ।

2.041.13c एदं ब॒र्हिर्नि षी॑दत ॥

2.041.13a viśve̍ devāsa̱ ā ga̍ta śṛṇu̱tā ma̍ i̱maṁ hava̍m |
2.041.13c edam ba̱rhir ni ṣī̍data ||

2.041.14a ती॒व्रो वो॒ मधु॑माँ अ॒यं शु॒नहो॑त्रेषु मत्स॒रः ।

2.041.14c ए॒तं पि॑ब॒त काम्य॑म् ॥

2.041.14a tī̱vro vo̱ madhu̍mām̐ a̱yaṁ śu̱naho̍treṣu matsa̱raḥ |
2.041.14c e̱tam pi̍bata̱ kāmya̍m ||

2.041.15a इन्द्र॑ज्येष्ठा॒ मरु॑द्गणा॒ देवा॑सः॒ पूष॑रातयः ।

2.041.15c विश्वे॒ मम॑ श्रु॒ता हव॑म् ॥

2.041.15a indra̍jyeṣṭhā̱ maru̍dgaṇā̱ devā̍sa̱ḥ pūṣa̍rātayaḥ |

2.041.15c viśve mama śrutā havam ||

2.041.16a अम्बितमे नदीतमे देवितमे सरस्वति ।

2.041.16c अप्रशस्ता इव स्मसि प्रशस्तिमम्ब नस्कृधि ॥

2.041.16a ambitame nadītame devitame sarasvati |
2.041.16c apraśastā iva smasi praśastim amba nas kṛdhi ||

2.041.17a त्वे विश्वा सरस्वति श्रितायूंषि देव्याम् ।

2.041.17c शुनहोत्रेषु मत्स्व प्रजां देवि दिदिड्ढि नः ॥

2.041.17a tve viśvā sarasvati śritāyūṁṣi devyām |
2.041.17c śunahotreṣu matsva prajāṁ devi didiḍḍhi naḥ ||

2.041.18a इमा ब्रह्म सरस्वति जुषस्व वाजिनीवति ।

2.041.18c या ते मन्म गृत्समदा ऋतावरि प्रिया देवेषु जुह्वति ॥

2.041.18a imā brahma sarasvati juṣasva vājinīvati |
2.041.18c yā te manma gṛtsamadā ṛtāvari priyā deveṣu juhvati ||

2.041.19a प्रेतां यज्ञस्य शम्भुवा युवामिदा वृणीमहे ।

2.041.19c अग्निं च हव्यवाहनम् ॥

2.041.19a pretāṁ yajñasya śambhuvā yuvām id ā vṛṇīmahe |
2.041.19c agniṁ ca havyavāhanam ||

2.041.20a द्यावा नः पृथिवी इमं सिध्रमद्य दिविस्पृशम् ।

2.041.20c यज्ञं देवेषु यच्छताम् ॥

2.041.20a dyāvā naḥ pṛthivī imaṁ sidhram adya divispṛśam |
2.041.20c yajñaṁ deveṣu yacchatām ||

2.041.21a आ वामुपस्थमद्रुहा देवाः सीदन्तु यज्ञियाः ।

2.041.21c इहाद्य सोमपीतये ॥

2.041.21a ā vām upastham adruhā devāḥ sīdantu yajñiyāḥ |
2.041.21c ihādya somapītaye ||

2.042.01a कनिक्रदज्जनुषं प्रब्रुवाण इयर्ति वाचमरितेव नावम् ।

2.042.01c सुमङ्गलश्च शकुने भवासि मा त्वा का चिदभिभा विश्व्या विदत् ॥

2.042.01a kanikradaj januṣam prabruvāṇa iyarti vācam ariteva nāvam |
2.042.01c sumaṅgalaś ca śakune bhavāsi mā tvā kā cid abhibhā viśvyā vidat ||

2.042.02a मा त्वा श्येन उद्वधीन्मा सुपर्णो मा त्वा विददिषुमान्वीरो अस्ता ।

2.042.02c पित्र्यामनु प्रदिशं कनिक्रदत्सुमङ्गलो भद्रवादी वदेह ॥

2.042.02a mā tvā śyena ud vadhīn mā suparṇo mā tvā vidad iṣumān vīro astā |
2.042.02c pitryām anu pradiśaṁ kanikradat sumaṅgalo bhadravādī vadeha ||

2.042.03a अव क्रन्द दक्षिणतो गृहाणां सुमङ्गलो भद्रवादी शकुन्ते ।

2.042.03c मा न स्तेन ईशत माघशंसो बृहद्वदेम विदथे सुवीराः ॥

2.042.03a ava kranda dakṣiṇato gṛhāṇāṁ sumaṅgalo bhadravādī śakunte |
2.042.03c mā na stena īśata māghaśaṁso bṛhad vadema vidathe suvīrāḥ ||

2.043.01a प्रदक्षिणिदभि गृणन्ति कारवो वयो वदन्त ऋतुथा शकुन्तयः ।

2.043.01c उभे वाचौ वदति सामगा इव गायत्रं च त्रैष्टुभं चानु राजति ॥

2.043.01a pradakṣiṇid abhi gṛṇanti kāravo vayo vadanta ṛtuthā śakuntayaḥ |
2.043.01c ubhe vācau vadati sāmagā iva gāyatraṁ ca traiṣṭubhaṁ cānu rājati ||

2.043.02a उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि ।

2.043.02c वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमा वद विश्वतो नः शकुने पुण्यमा वद ॥

2.043.02a udgāteva śakune sāma gāyasi brahmaputra iva savaneṣu śaṁsasi |
2.043.02c vṛṣeva vājī śiśumatīr apītyā sarvato naḥ śakune bhadram ā vada viśvato naḥ śakune puṇyam ā vada ||

2.043.03a आवदँस्त्वं शकुने भद्रमा वद तूष्णीमासीनः सुमतिं चिकिद्धि नः ।

2.043.03c यदुत्पतन्वदसि कर्करिर्यथा बृहद्वदेम विदथे सुवीराः ॥

2.043.03a āvadaṁs tvaṁ śakune bhadram ā vada tūṣṇīm āsīnaḥ sumatiṁ cikiddhi naḥ |
2.043.03c yad utpatan vadasi karkarir yathā bṛhad vadema vidathe suvīrāḥ ||

Notes by Detlef Eichler (detlefeichler(at)gmx.net):

1. Please note that this PDF file is not for commercial use and released only for personal scholarly activity.

2. This combined version of Rigveda is from two ITRANS files which I have created on the basis of The Aufrecht/van Nooten/Holland (Samhita) version of the Rigveda.
(http://www.people.fas.harvard.edu/~witzel/onlineRV.htm)

3. The used fonts are Ancient Sanskrit 99 and URW Palladio IT. For the numbers of Maṇḍala, Sūkta, and Mantra at the beginning of each line (2.001.01a) the font Times New Roman is used.

4. Last updated: 15 September 2008